श्रीमच्छङ्करकिङ्करब्रह्मानन्दकर्मन्दि-
नरकण्ठीरवीयम्

दक्षिणावर्तविनायकः (வலம்புரி)
श्रीकाञ्चीपुरविद्यमानश्रीवरदराजदेवालये स्थितः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीरस्तु

श्रीमच्छङ्करकिङ्करब्रह्मानन्दकर्मन्दि-

नरकण्ठीरवीयम्

॥ ओम् ॥

यो मायीव विरच्य विश्वमखिलं . . ,
रक्षत्यत्ति चराचरात्मकमिदं दीपस्तमिस्रं यथा ।
साक्षात्कृत्य यमेकतामधिगताः प्राञ्चो विरिञ्चादय-
स्तस्मै मे नतिरस्त्वनन्यभविनः कस्मै . . . . . ॥

श्री . . . मण्डलमण्डनायमान मण्डनमिश्राद्य . . . आखण्डलशि-रश्चुम्बितपादपीठान्तश्रीमच्छङ्करभगवद्भाष्यकृद्भ्यो नमः ।

"मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।"

. . . कणादपतञ्जल्यक्षपादैर्विपक्षपक्षप्रतिक्षेपप्रकरणेषूक्तलक्षणलक्षितद्वैताद्वैते एव मिथः प्रतिपक्षत्वेन कक्षीकृते । सम्प्रदायविशुद्ध्यादिविसृष्टं विशिष्टाद्वैतं, नामतस्त्व रूपतो वा क्वचित्कदाचित्किञ्चित् स्मृतिपथमप्यनवगमितं श्रीमद्रामानुज-श्रुतप्रकाशिकाकारादिभिर्हसन्तिकारविन्दवत्स्वमतिपरिणामावधि निर्मूलमलमु-त्प्रेक्षितमेवेति तदीयापूर्वश्रीभाष्यादिग्रन्थजातमेव साकल्येनार्थतः पक्षपातं विना समीक्षितवतां तत्पक्षगतानामपि केषाञ्चित्प्रेक्षावतां करबदरायितम् । अत्रादौ पन्थानं गच्छंस्तृणं स्पृशतीतिन्यायेन विमतस्य नामतोऽसामञ्जस्यम्प्रदर्श्य पश्चात् स्वरूपतोऽसामञ्जस्यम्प्रदर्श्यते । तथाहि किं विशिष्टमद्वैत . . . . . .

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योरद्वैतम्। नाद्यः। अत्रा . . . . . मद्वैतमित्युक्ती . . . . . विशेष्यतत्संबं . . . . . ण्डकुण्डलविशिष्ट . . . . . दण्डविशिष्ट एव कुण्डलविशिष्टः। कुण्डलविशिष्टः एव दण्डविशिष्टः दण्डकुण्डलविशिष्टत्वाकारेण तयोर्भेदात्। अन्यथा क्वचिद्दण्डापाये कुण्डलिनि दण्डीति वा कुण्डलापाये दण्डिनि कुण्डलीति वा प्रत्ययप्रसङ्गः। किञ्चैते दण्डपुरुषसम्बन्धा इति समूहालम्बन . . . . दण्डीतिविशिष्टप्रत्ययत्व-प्रसङ्गः। अपि च दु . . ग्ध वनस्पतित्रितयगोचरैकत्वबुद्धिवत् चिदचिदीश्वरत्रितयगोचरैकत्वबुद्धेरपि भ्रान्तित्वेन, तत्त्वतो विशिष्टस्यैव मिथ्यात्वात्।

यत्तावदुक्तं ब्रह्ममीमांसाशास्त्रकारेण भगवता व्यासेन

सू—" विप्रतिषेधाच्चासमञ्जसम् " इत्यस्मिन् सूत्रे विप्रतिषेधार्थकपदं सांख्यदर्शनासामञ्जस्यकारणमित्यभा . . . .

' अतश्शतं विरोधानां भाष्ये रामानुजेरिते।
दुरुद्धरं हरेणापि हरिणापि निरूप्यते ' ॥

इति श्लोके सांख्यदर्शनासामञ्जस्यकारणं विप्रतिषिद्धार्थकथनमत इति हेतुतयोपादाय तद्धेतुकत्वं श्रीभाष्ये दुरुद्धरविरोधशतनिरूपणे प्रतिपाद्यमानं कथन्नु नाम सङ्गच्छत इति तदुमामहेश्वर— . . . . . सदतिगम्भीरतात्पर्या . . . . . निगूढाशय . . . . . विषयी—सांख्याद्यार्षदर्शनेष्वपि तत्तद्दर्शनासामञ्जस्य-कारणस्य विप्रतिषिद्धार्थकथनस्य सत्वे सत्यपूर्वरामानुजीयदर्शने तदसामञ्जस्य कारणसत्वस्य कैमुतिकन्यायसिद्धताप्रख्यापनाय सांख्यदर्शनासामञ्जस्यकारणं विप्रतिषिद्धार्थकथनमत इति हेतुतयोपादाय श्रीभाष्ये दुरुद्धरविरोधशतनिरूपणे प्रतिपाद्यमानस्य तद्धेतुकत्वस्यातीव संगतत्वात्। अन्यथा अद्वैतेतरसांख्याद्यार्ष-दर्शननिषेधपराणि सू—' ईक्षतेर्नाशब्दं, एतेन योगः प्रत्युक्तः, महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां, रूपादिमत्त्वाच्च विपर्ययो दर्शनात्, एतेन सर्वे व्याख्या . . .

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीनि सूत्राणि . . . . . वेदवास्तव . . . . . शाणोल्लिखित-
. . . . वाद . . . . .

यच्च विप्रतिषिद्धार्थकथनमिति वक्तव्ये विप्रतिषेधार्थकथनमित्युमा-महेश्वरवर्णनं धर्मधर्मिविवेकाभावनिबन्धनमिति, तदसमानमतिसन्धानप्रक्षुभित विपक्षपक्षाकूपारस्योमामहेश्वरसूरेः . . . मेरोर्जङ्घालस्य वालुकाकणलङ्घनमि . . . र्यमेवेति स्वतोभास्वन्मतयः स्वत एव विदाङ्कुर्वन्तु। अन्यथा उमामहेश्वरसूरेः धर्मधर्मिविवेको नास्तीति वक्तुः परस्य विरोधवरूथिनीप्राचीनानेककोशस्थ-विप्रतिषिद्धार्थकथनमिति वाक्यावलोकने जात्यन्धतामवगमयद् गुणेष्वकारण-दोषारोपणैकप्रकृतितामप्यवगमयतीत्यलं प्रपञ्चेन। . . . दुरुद्धरविरोधशतं नि . .
. . . . . विरोधारोपण . . . . .
. . . . . तदु . . . .
. . . . . नुजभाष्य-
. . . . . ख्यात-
महाग्रन्थास्तित्वानवधारणकारणम्, यत्र रामानुजभाष्यस्थदुरुद्धरविरोधशतं शते-पञ्चाशन्न्यायसिद्धम्।

यच्च मायावादि - प्रच्छन्नबौद्ध - कलियुगवेदान्त्यादिशब्दाभिलप्यमान कुमतिजनप्रचारितवेदविरुद्धार्थकल्पनामयावैदिकपक्षक्षपणनिपुणेति स्वयूथ्यैरुद्घोषितां शतदूषणीं नाम काञ्चन कृतिं परमैकान्तिधर्म, परमवैदिकधर्म, परमधर्म, प्रथमधर्म, कार्तयुगधर्म इत्यादि शब्दाभिलप्यमानविशिष्टाद्वैतसिद्धान्तनिष्ठो वेदान्ताचार्यनामा कश्चिद्विपश्चित् . . . उमामहेश्वर . . . . . .
. . विरोध . . . म इति तत् स्वपक्षपरपक्षयोर्वैदिकत्वावैदिकत्व-सम्भावनायां नैव पार्यते। उदाहृतपरमैकान्तिधर्मइत्यादिशब्दानां नित्यानुमेय कल्प्यभिन्नक्लृप्तश्रुतिषु मृग्यत्वेन विशिष्टाद्वैतसिद्धान्तस्य, तन्मूलकवैदिकत्वस्या-शामोदकतुल्यत्वात्। किञ्चोदाहृतशब्दव्यक्तयः क्वचिद्वेदेषु मरौ सर इवात्मान-मुपलभेरन्। तद् पादौ (?) तासां परमैकान्तिधर्म इत्यादिशब्दव्यक्तीनां तादूप्येण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वाभिमतविशिष्टाद्वैतशक्तिकत्वस्य स्वकीयमतसमयमात्रसिद्धत्वेन वैदिकत्वसम्पादनाक्षमत्वाच्च विशिष्टाद्वैतं न विशिष्टशिष्टजनाभिमतमिति स्पष्टम् ।

यच्च - सू— 'तदनन्यत्वमारम्भणशब्दादिभ्य'—इत्यधिकरणश्रीभाष्ये कृत्स्नस्यापि जगतो ब्रह्म . . . . . न्तर्भूतत्वफलितशरीरशरीरिभाव . . . . . सूत्रकारस्याभिमत . . . . . मृद्घटयोरिव ब्रह्मजगतोरनर्थान्तरत्वप्रत्ययोत्पादनैकप्रयोजनप्रवृत्तिकत्वेन ब्रह्मणि जडताद्यनेकानर्थहेतुशरीरिभावलक्षणतादात्म्याध्यासस्यापि जडाजडविषयतया चेतनयोः परजीवयोस्तदयोगाच्च । तदुक्तं गीताचार्येण भगवता श्रीकृष्णेनः—

'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥'

इति । अनेन तादात्म्यपक्षस्सूत्रकारस्यानभिमत एवेति वेदितव्यम् ।

यदुक्तं ब्रह्ममीमांसाशास्त्रद्वितीयाध्यायद्वितीयपादे आर्हतमतदूषणावसरे सूः—न च पर्यायादप्यविरोधो . . . . रादिभ्य इति सूत्रश्रीभाष्ये . . . . . यशब्दभिधेयाव . . . , . . . हर्तुं शक्यः .... शालिनो जीवस्य घटादितुल्यत्वेनानित्यत्वमुक्त्वात्मनि वर्तमानस्य सङ्कोचविकासशालिनो धर्मभूतज्ञानस्याप्यनित्यत्वे वक्तव्ये श्रुतिबलान्नित्यत्वमस्मदाचार्यैरुक्तं तत् . . . . . प्रतिषेधः पुराणश्रोतॄणामेव न तद्वक्तुरिति पौराणिकोक्तिमनुकरोतीति वर्णनं श्रीभाष्यपङ्क्त्यर्थाज्ञानविजृम्भितम् । श्रीभाष्येप्यात्मनि वर्तमानस्य धर्मभूतज्ञानस्य द्रव्यत्वे नित्यत्वे चः—

श्रुः- न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, विनाशित्वान्न तु तद्द्वितीयमस्ति । सूः—'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनादिति' श्रुतिसूत्रद्वयं प्रमाणीकृत्य कदाचिल्लोपाभावश्च संसाधितः । एवं साधयं . . . . . माशयः स्वरूपतो नित्यस्य . . . . . पेण कादाचित्क . . . . . .

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

. . . . . चार्याणामिष्ट .

. . . . . .

तात्पर्यपर्यालोचनाभावप्रयुक्तम् । तस्य श्रुतिसूत्रद्वयस्यामुक्तेरेव धर्मभूतज्ञानास्तित्वतात्पर्यकत्वेन मुक्तौ तदस्तित्वतात्पर्यकत्वानुपपत्तेः । तदुक्तं . . .

कूटस्थः करणी ज्ञानं करणं तस्य नेतरत् ।

निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तते' ॥ इति ।

श्रीमच्छङ्करभगवद्भाष्यकारा अपि स्वप्रणीतात्मबोधाख्यप्रकरणे तथैवाहुः—

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।

कृत्वा ज्ञानं स्वयं नश्येत् जलं कतकरेणुवत् ॥ इति ।

पाञ्चरात्रागमेऽपि :—

आ मुक्तेर्भेद एव स्याज्जीवस्य च परस्य च ।

मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥ इति ।

कृतमतिबहुना । अणुविभ्वोरा . . . . . .

पमेर्वोरिव द्रव्यत्वनि . . . . . .

. . . . . .

स्फुटमत एव । ध्यायतीव लेलायतीवेति श्रुतिः इवकारेणात्मनि बुद्ध्यादेरध्यासं दर्शयति ।

स्मृः-प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।

अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥

इति गीताचार्यवचनेनात्मन्यहङ्कारनिष्ठकर्तृत्वाध्यासः स्फुटीकृतः । 'लः कर्मणि च भावे चाकर्मकेभ्य' इति व्याकरणस्मृतिः कर्तरि लकारं विधत्ते । ततश्च विज्ञातृशब्दवाच्येन ज्ञानकर्त्रा क्रियमाणायाः विज्ञातिशब्दवाच्यायाः बुद्धेर्न्यायप्राप्तो विनाशो न युक्तिशतेनापि परिहर्तुं शक्यः । इममेवार्थं मनसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निधाय श्रीमच्छङ्करभगवत्पूज्यपादैस्स्वप्रणीतलोकत्रयभूष्यशारीररकब्रह्मसूत्रभाष्यस्यादावध्यासभाष्ये तत्स्वरूपनिरूपणाय, आह, कोऽयमध्यासो नामेति, उच्यते, स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः। तं केचिदन्यत्रान्य . . . . . .
. . . . स्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति मतान्तराण्यनूद्य सर्वथाप्यन्यत्रान्यधर्मावभासतां न व्यभिचरतीति वाक्यमदर्शि। तद्विवरणकारैः प्राचीनैरर्वाचीनैश्चात्मोपाधिभूतायाः बुद्धेः कर्तृत्वस्यात्मन्यारोपो वा कर्तृत्वान्तरस्योत्पत्तिर्वेति विकल्प्य आद्यपक्षे जपाकुसुमस्फटिकलौहित्यन्यायेनात्मनि सत्यमिथ्याकर्तृत्वद्वय प्रतिभासमुक्त्वा धर्मयोर्धर्मिणोश्च ब्रह्मणि शुक्तौ रजतवत्कल्पितत्वात् न वैशेषिकाभिमतान्यथाख्यातिरतो धर्मधर्मिणोश्च ब्रह्मणि तादात्म्यमिति दूषणद्वयं परिहृत्य धर्मान्तरारोपधर्मान्तरोत्पत्तिपक्षौ समर्थितौ। इदमेव श्रुतिस्मृतिसिद्धं नान्यदिति व्यक्तमुक्तम्। अतएवः—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम्॥ इति

प्राचां वचने . . . . . .
पञ्चोक्तास्तात्र अतः ख्या . . . . . .
. . . . . .
. . . यो बौद्धाः असत्ख्यातिवादिनः तदेकदेशीयाः, माध्यमिकनामानः शून्यवादिनः, अन्यथाख्यातिवादिनः पिठरपाकवादिनैय्यायिकभिन्नपीलुपाकवादिनो वैशेषिकाः, अख्यातिवादिनः कर्ममीमांसका, अनिर्वचनख्यातिवादिनो ब्रह्ममीमांसकाः। ख्यातिरत्र ज्ञानमिति संक्षेपः। नचान्यत्रापणादौ सतो विद्यमानस्यैव रजतस्यान्यत्र शुक्त्यादावारोपो वा भ्रमः। कथमत्यन्तासतः प्रपञ्चस्य ब्रह्मण्यारोप इति वाच्यम्। अन्धपरम्परान्यायेन पूर्वपूर्वभ्रमस्योत्तरोत्तरभ्रमोपादानत्वेनारोपसिद्धेः। तदुक्तं श्रीभागवतेः—

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं
व्यभिचरति क्व च मृषा न तथोभययुक्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यवहृति यो विकल्प इषितोन्धपरम्परया

भ्रमयति भारतीति . . . . . इम्-

. . . . . जाग्रत्स्वप्नोन्तःकरणभ्रमः

. . . . . .

. . . . . .

न्विता । "आत्माग्रहेण मनसा परिकल्पितं यत्तन्नास्ति चात्मनि परे परिशील्यमाने । रज्ज्वां प्रतीतभुजगोपममेव सर्वमाभासमात्रमसदभ्रसरोजकल्पम् । ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः" ॥ इत्यादि । श्रूयते चैवमेवः—

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।

तथा जाग्रत्प्रपञ्चोऽपि मयि मायाविजृम्भितः ॥ इति ।

स्वप्नप्रपञ्चस्य त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं सूत्रकारेण भगवता व्यासेनापि सूत्रितं—'मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' इति । ततश्च ब्रह्मणि जगच्छुक्तिकायां रजतमिवाज्ञानाध्यस्तमेवेति सिद्धम् । न चात्मानमिति ब्रह्मणः कर्मत्वं, अकुरुतेति कर्तृत्वं, प्राविशदिति कर्तुरेवानन्य कार्यानुप्रवेशश्चाभिदधत्याः, श्रुः—'तदात्मानं स्वयमकुरुत । तत्सृष्ट्वा तदेवानुप्राविशत्', इति तित्तिरिश्रुतेः का गतिरिति वाच्यम् । तस्या अपि ब्रह्मणः प्रपञ्चं प्रति विवर्तोपादानकारणत्वतात्पर्यकत्वेन चारितार्थ्यात् ।

अत एव श्रीमच्छङ्करभगवत्पूज्यपादाः स्वप्रणीतलोकत्रयभूष्यशारीरक ब्रह्मसूत्रभाष्ये 'यथा कश्चिन्मायावी निरुपादानमात्मानमेवात्मान्तरत्वेनाकाशे गच्छन्निव निर्मिमीते, तथा महामायो देवोऽपि निरुपादानमात्मानमेवात्मान्तरत्वेन जगद्रूपेण च निर्मिमीते' इति युक्ततरमिति सोपपत्तिकं वाक्यमयूयुजन् । एतेन ब्रह्मणो विषमसत्ताकान्यथात्वलक्षणविवर्तपक्ष एवाक्षतो न तत्समसत्ताकान्यथात्वलक्षणपरिणामपक्षो न वा तदारंभपक्ष इति वेदितव्यम् । अन्यथा ब्रह्मणि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जडत्वदुःखित्वादयो दोषाः संख्यातिगाः स्युः । तदुक्तं सूतसंहितान्तर्गतब्रह्मगीतायाम्—

दृश्यत्वाद् विमतं मिथ्या शुक्तिकारजतादिवत् ।
ततोऽलीकजगद्धेतुर्मायैव न महेश्वरः ॥
कार्यरूपस्य जगतः सत्यत्वे सति सत्तमाः ।
परिणामस्तथारम्भः खलु शंभोर्भविष्यति
तदभ्युपगमे च स्युर्ब्रह्मणो जडतादयः ॥ इति ।

स्मर्यते चैवमेवः—

असत्यद्वैतनिष्ठस्तु कर्मकाण्डस्त्वशोभनः ।
वास्तवाद्वैतनिष्ठस्तु ब्रह्मकाण्डस्सुशोभनः ॥ इति ।

इदमेवोक्तं भगवता वार्तिककारेणापि-

ननु भेदाश्रितैर्वाक्यैर्विधायकनिषेधकैः ।
अक्षादिभिश्च नैकात्म्यं बाधितत्वात् प्रमाणवत् ॥
वर्तते लोकतस्सिद्धं भेदमाश्रित्य चोदना ।
वर्तते पुरुषार्थाय न तु भेदावबुद्धये ॥
भेदस्यापरमार्थत्वात् तादर्थ्ये स्यादमानतेति ।

इदमत्रावधेयम्—भेदश्रुतयः स्वतःसिद्धभेदानुवादद्वारा अस्वतस्सिद्धाभेदतात्पर्यकाः । निषेधश्रुतयः सर्वदृश्यनिषेधद्वारा तदवधिकब्रह्मतात्पर्यका इति श्रुतिसमन्वयः । अस्मिन्नर्थे "तत्तु समन्वयात्" इति वैयासिकसूत्रं सर्वासां श्रुतीनां अद्वैते ब्रह्मणि तात्पर्यमिति शाङ्करवार्तिकञ्च मानम् ।

एतेन कर्मब्रह्मकाण्डयोः पूर्वापरसमुद्रवद्विभिन्नविषयत्वेन भिन्नप्रस्थानत्वात् ज्ञानकर्मणोस्समुच्चयवाद एव न केवलं दूराद्गलहस्तितः किन्तु ब्रह्मणः तदात्मानमिति श्रुतिसिद्धोभयविधकारणत्वमनभ्युपगच्छतामद्वैतिनां वेदाबाह्यकोटावनुप्रवेशो दुर्वारः । अद्वैतिभिरध्यारोपापवादन्यायः कल्पितः श्रुतिवाक्यानां दुर्बलप्रबलभेदेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाध्यबाधकभावो नास्तीति चैवमादिः परकृतानल्पकोलाहलोऽपि निर्मूल एवेति वेदितव्यम् ।

यच्च ब्रह्मणो जगत्कारणत्वनिर्वाहाय कार्यकारणयोर्विभागानर्हसम्बन्ध-विशेषस्य वृत्तिनियामकत्वस्वीकारे अस्वीकारे वा साक्षात्कारणतावच्छेदकतायां विवादेऽपि परम्परया कारणतावच्छेदकतासम्बन्धमात्रं निरपवादमेवेत्युक्त-कार्यकारणभावो दुरपह्नवः इति तच्छिरोवेष्टननासास्पर्शमनुकरोति । कपालघट शरावोदञ्चनाद्युपादेयनिष्ठतत्तदाकारलक्षणविकाराणां तत्तद्व्यक्तिनिष्ठत्वेऽपि सर्वोपा-दाने मृत्पिण्डे पर्यवसानस्य सर्वलोकदृष्टचरत्वात्तन्न्यायेनाव्यक्तमहदहङ्काराद्युपादेय-निष्ठतत्तदाकारलक्षणविकाराणां तत्तद्व्यक्तिनिष्ठत्वेऽपि सर्वोपादाने ब्रह्मणि पर्यवसानावश्यम्भावेन ब्रह्मणो जडत्वदुःखित्वाद्यभावोक्तेर्निर्युक्तिकत्वेनाकिञ्चित्क-रत्वात् ।

यच्च कौटस्थ्यशब्दार्थः किं ब्रह्मणि पारमार्थिकविकारप्रतियोगिकः आहोस्वित् व्यावहारिकप्रातिभासिकविकारप्रतियोगिकः । आद्ये अद्वैतिभिर्ब्रह्मणि पारमार्थिकविकारस्य अनभ्युपगतत्वेन तत्प्रतियोगिकविकाराभावस्य असिद्धिः । द्वितीये व्यावहारिकप्रातिभासिकविकाराणामन्योन्याभावस्य सत्त्वेनेदृशकौटस्थ्यस्य घटादि-प्रसिद्धविकारिष्वतिप्रसक्ततया अव्यावर्तकत्वाद्ब्रह्मविषमसत्ताकान्यथात्वलक्षणविवर्त-वादाङ्गीकारेण तत्समसत्ताकान्यथात्वलक्षणपरिणामवादाङ्गीकारप्राप्तविकाराभावरूपं कौटस्थ्यं निर्बाधमित्यपि निरर्थमिति तत्स्वदत्तस्वपादनिगलसन्निभं विकल्पासहत्वात् । ब्रह्मश्रितस्य विकारस्य पारमार्थिकत्वं नाम, किं स्वाश्रयब्रह्मण इव त्रैकालिक-निषेधाप्रतियोगित्वं, आहोस्वित् मृद्घटस्येव व्यावहारिकत्वं, उत शुक्तिरजतवत् प्रातिभासिकत्वं ? आद्ये ब्रह्मणो निरुक्तविकारादनिर्मोक्षप्रसङ्गः । तदुक्तम-भियुक्तैः—

यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात्स्वभावतः ।
न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि ॥ इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीये घटोत्पत्तेः प्राक् विनाशानन्तरञ्च मृदि घटाकारविकाराभावेपि तदाकारपरिणामदशायां घटाकारविकारस्य दुर्वारत्वात्, तन्न्यायेन जगदुत्पत्तेः प्राक् विनाशानन्तरञ्च ब्रह्मणि जगदाकारविकाराभावेऽपि तदाकारपरिणामदशायां जगदाकारविकारस्य दुर्वारत्वात्। अन्यथा अविकृतस्यैव मृत्सुवर्णादेर्घटकरकाद्याकारपरिणामतापत्तेः। तत्सम्भावयितुं चतुराननोऽपि नालं किमन्ये इत्यलं मुधालापैः। तृतीये इष्टापत्तिः। ततश्च एनयोर्दोषः परिहार्योऽन्यो न परिहार्यः। स च दोषः स्वेनान्यस्मिन्नुद्भावनीयः। उभाभ्यामप्यपरिहार्यो यादृशरूपेण यो दोषस्स च दोषस्तादृशरूपेणान्योन्यमनुत्थापनीय- इत्येष एव सतां पन्थाः।

यच्च अचिदंशे स्वरूपान्यथात्वलक्षणविकारः, चिदंशे धर्मान्यथात्वलक्षणविकारः, नियन्त्रंशे ब्रह्मणि तदवस्थतदुभयविशिष्टतारूपविकारो भवति। अतो विकारिचिदचिद्वैशिष्ट्यकृत एव विकारो न स्वतः। ततश्च चिदचिन्निष्ठापुरुषार्थविकारैर्ब्रह्म न स्पृश्यत इति। तन्न युक्तिमत्। अंशिनस्सर्वांशानुगतत्वेनांशविकाराणामंशिन्येव पर्यवसानस्य तन्तुपटादिषु दृष्टचरत्वादतस्तन्तुपटदृष्टान्तो न विशिष्टाद्वैतसाधक इति स्पष्टम्। अन्यथा पटांशानान्तन्तूनां पङ्कादिसंस्पर्शे सत्यंशिनः पटस्य न केवलमतत्संस्पर्शः किन्तु तन्तुषु दह्यमानेषु सत्सु पटो न दह्यत इति स्यादिति वक्तुं युक्तम्। ततश्च स्वाश्रयब्रह्मापृथक्सिद्धविशेषणीभूतचिदचिन्निष्ठापुरुषार्थविकारैः ब्रह्म न स्पृश्यत इति परोक्तमयुक्तमेवेत्यत्र न कश्चिद्विवादावकाशः। इदमत्रावधेयम्। अनंशे ब्रह्मणि चिदचिल्लक्षणांशालम्बनेनांशिनो ब्रह्मणः परकृतनिर्विकारत्वपरिरक्षणं शुष्कतृणस्तम्भचयालम्बनेनाङ्गारतरङ्गिणीतितीर्षुकृतस्वशरीररक्षामनुकरोतीत्यनेन स्वांशभूत सर्वजीवानुगतोंऽशिभूतः परमात्मा असंसारी तदेकदेशांशभूतो जीवात्मा संसारी, ब्रह्मणो निर्विकारत्वाद्यविरोधिपरिणामविशेषं जगदित्यादिनिर्युक्तिकपरोक्तयस्सर्वा अपि प्रत्युक्ता एवेति वेदितव्यम्। ततश्च मृद्घटदृष्टान्तः परदिदर्शयिषितश्रुतिविश्रुतसर्वाद्वैतसाधक एव; न तत्त्वत्रयसापेक्षविशिष्टाद्वैतसाधक इति स्पष्टम्। तथा च त्रिपाद्विभूतिमहानारायणोपनिषद्वाक्यं—'भगवन्, शुद्धाद्वैतपरमानन्दलक्षणपरब्रह्मणस्तव कथं विरुद्धवैकुण्ठप्राकारप्रासा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दाद्यनन्तवस्तुभेदस्सत्यमेवोक्तमिति । भगवान् परिहरतिः—यथा शुद्धसुवर्णस्य कटकमकुटाङ्गदादिभेदस्तथैवाद्वैतपरमानन्दलक्षणपरब्रह्मणो मम सर्वाद्वैतमुपपन्नं भवति इत्यतस्तदनन्यत्वाधिकरणं मृद्घटयोरिव ब्रह्मजगतोरनर्थान्तरत्वावगत्युत्पादनैक प्रयोजनप्रवृत्तिकमेवेति वेदितव्यम् । श्रूयते चैवमेवः—'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्,' इति । अत एव यया कयाचिदाकृत्या युक्तं सुवर्णं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते, पुनरावृत्तसुवर्णपिण्डः खदिराङ्गारसदृशे कुण्डले भवत इत्याकृतिरन्या चान्या च भवतीत्यनित्यैव सा । आकृत्युपमर्देऽप्यवशिष्यमाणं द्रव्यमेव नित्यमिति भगवत्पतञ्जलिप्रणीताकरगन्थोप्युक्तार्थमेवाभिव्यनक्ति । अन्यथा कनकार्थिनोऽन्विष्यान्विष्य कुत्रचित्प्राप्तकनकविकारान् कटकमकुटादींन् कनकेतरबुद्धया परित्यज्य पुनः कनकान्वेषिण एव स्युः । अथवा यो यद्विकारः स तदात्मतां परित्यज्यान्यत्रात्मानमुपलभेत । परित्यागेचाभावप्राप्तिरिति सर्वेषां नः प्रत्यक्षमेव । अतो घटेन जलमाहरेत्यादिव्यवहारसौकर्याय तत्र कल्पितनामरूपव्याकरणमात्रमुपादानोपादेययोः मृद्घटयोर्भेदविभाजकमितिवदद्वैशेषिकादन्यः कश्चिदनुन्मत्तो नानुसन्धत्त इत्यलमतिचर्चया ।

यच्चः—

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात्क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतस्सम्भवः कुतः ?
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥

इति स्मृतिरवबोधादीनां आत्मगुणत्वे प्रमाणमिति, न तत्स्वार्थे प्रमाणभावमुपैतुमुत्सहते । तस्याः स्मृतेरवबोधादीनामात्मस्वरूपत्वावगत्युत्पादनैकप्रयोजन-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवृत्तिकत्वेन तद्गुणत्वावगत्युत्पादनप्रवृत्तिकत्वानुपपत्तेः। अन्यथा—श्रुः—'सत्यं ज्ञानमनन्तं ब्रह्म'

स्मृः—भेद एक स्स यः प्राप्तस्स मृषा चन्द्रभेदवत्।
तस्मात्सत्यचिदानन्दा गुणा न परवस्तुनः॥

स्वरूपमेव, भेदस्तु तस्याज्ञानविजृम्भितः।

इत्याद्यनन्यगतिकानेकश्रुतिव्याकोपो भवेद्वज्रलेप इव दुरुद्धर इत्यलमतिविस्तरेण। यच्चः—

श्यामो युवा लोहिताक्षो देवदत्त इतीरिते।
विशेषणानां भेदेऽपि विशेष्ये न हि भेदधीः॥

इति स्मृतावनेकविशेषणवतो देवदत्तस्यैकत्वं दृष्टं, एवं चिदचिद्विशिष्टस्यापि ब्रह्मण एकत्वमेष्टव्यमिति, तदेतद्विशिष्टपक्षावलम्बिनामिष्टार्थं न संभावयितुमीष्टे। श्लोके श्यामत्वादिविशेषणविशिष्टदेवदत्तातिरिक्तस्य व्यावर्त्यान्तरस्य शुक्लत्वपिङ्गाक्षत्व-वृद्धत्वादिविशिष्टस्य यज्ञदत्तस्य विद्यमानत्वात्तद्व्यावृत्त्यर्थं देवदत्ते श्यामत्वादिविशेषण-दानस्यौचित्येऽपि ब्रह्मणोऽन्यस्य व्यावर्त्यान्तरस्याभावाद्ब्रह्मणि चिदचिल्लक्षणविशेषण-दानस्याप्रयोजकत्वात्। ततश्च प्रत्यगभिन्नं चिदेकरसमद्वितीयं ब्रह्म निरस्ताशेष-विशेषमेवेत्यन्यत्र विस्तरः।

यच्च पञ्चीकरणप्रक्रियया रज्जुशुक्तिमरुमरीचिकास्वहिरूप्यसलिलानां विद्य-मानत्वात्तज्ज्ञानमपि सत्यमेव न भ्रान्तिरतः करणदोषात्तास्वहिरूप्यसलिलावयवानां प्रतीतिमात्रमेवेति तद् गुञ्जाबीजन्यायेनाच्छादितमात्मगतं प्रच्छन्नबौद्धत्वं सम्यक् व्यक्तीकर्तुं नोत्सहते। तदुक्तं पाषण्डमतखण्डनविरुदाङ्कितैः श्रीमदद्वैतभूषण कारैः—

ज्ञानं यथार्थं सकल जनानामिति प्रजल्पन्यतिलक्षणोऽयं।
शून्यात्मधीर्माध्यमिकस्य या स्याल्लोकायतस्यात्ममतिश्च देहे॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदाप्रमाणत्वमतिश्च शाक्य-
मुनेः प्रमैवेत्युररीकरोति ।
ततश्च किं बुद्धमुनेः कनिष्ठो
ज्येष्ठोऽथवा लक्ष्मणमस्करीन्द्रः ॥ इति

तस्मात् प्रत्यस्तमिताशेषविशेषप्रत्यगभिन्नं ब्रह्माहमेवेति जानतां सतां काकदन्तविचारसोदरोऽयं पञ्चीकरणविचारो न रुचिगोचरतामापद्यते। अन्यथा रासभावयवानामश्वे अश्वावयवानाञ्च रासभे विद्यमानत्वात्तदुभयारोहणयोरविशेषप्रसङ्गोऽपि स्यादभङ्गुरः ।

यच्च अल्पपरिमाणस्य वटबीजस्य स्वनिष्ठावयवातिरिक्तावयवान्तरसम्मेलनमन्तरैवात्मीयशक्तिवैचित्र्येण महावृक्षाकारपरिणाम इव आत्मनि वर्तमानस्य धर्मभूतज्ञानस्यापि स्वनिष्ठावयवातिरिक्तावयवान्तरसम्मेलनमन्तरैवात्मीयशक्तिवैचित्र्येण सङ्कोचविकासावपि सन्निकृष्टविप्रकृष्टदेशसंयोगवियोगलक्षणावेव, नोत्पत्तिविनाशलक्षणाविति ।

तत्कदाचिद्वस्तुतत्त्वापरिशीलनमूलम् । निरुक्तवटबीजस्य एकस्कन्धानेकशाखापत्रफलपल्लवोल्लासितमहावृक्षाकारेण परिणतेः स्वनिष्ठावयवातिरिक्तभूजलाद्यवयवान्तरसम्मेलनायत्तत्वात्तन्न्यायेनात्मनि वर्तमानस्य धर्मभूतज्ञानस्योत्पत्तिविनाशपर्यायसङ्कोचविकासयोरपि स्वनिष्ठावयवातिरिक्तपुरुषाशितान्ननिष्ठावयवान्तरसम्मेलनायत्ततया अवयवान्तरसम्मेलनमन्तरैवात्मीयशक्तिवैचित्र्येणेति परोक्तेर्निर्युक्तिक-निष्प्रमाणकत्वेनाकिञ्चित्करत्वात् ।

तथा च श्रूयतेः—'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति' । अत्रेदमवधेयं—ज्ञानाश्रयान्नकार्यान्तःकरणवृत्तिनिष्ठोत्पत्तिविनाशौ तदाश्रितात्मस्वरूपे ज्ञाने आरोप्येते इति तत्त्वम् ।

यच्च सूक्ष्मचिदचिद्विशिष्टं ब्रह्मोपादानं, स्थूलचिदचिद्विशिष्टं ब्रह्मोपादेयमवस्थानत्वञ्च चिदचिद्ब्रह्मणां त्रयाणामस्त्येव । इयांस्तु विशेषः—अचिदंशे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वरूपान्यथात्वलक्षणविकारश्चिदंशे धर्मान्यथात्वलक्षणविकारो ब्रह्मणि तदवस्थ-तदुभयविशिष्टतारूपविकारो भवतीति। तदपि ब्रह्मण्युक्तजडतादिदोषपुञ्जमा-पञ्चयितुमेवोत्सहते। तथाकथनस्यासकृत्तत्र दत्तोत्तरत्वेनात्रपुनरसमाधेयत्वात्। ततश्चानंशे ब्रह्मण्यंशकल्पनमल्पमतिप्रतारणप्रयोजनजमेवेत्यनल्पमतिभिर्वेदितव्यम्। अन्यथा एकमेकानुसन्धानेऽपरमेकप्रच्युतिवद्ब्रह्मणस्तदात्मानमिति श्रुतिसिद्धोभय-विधकारणत्वाभ्युपगमे ब्रह्मणि जडत्वदुःखित्वादिदोषप्रसङ्गः। तदनभ्युपगमे विवर्तकारणत्वातिरिक्तकारणत्वमात्रभङ्गप्रसङ्गश्चेत्यत्र न कश्चिद्दुर्विवादावकाश इत्याविद्वदागोपं शिलाघनमध्यस्थप्रदीपसहस्रवत्सुप्रसिद्धमेवेत्यलमतिविस्तरेण।

न च न्यायामृतकारैर्मायामात्रमिति श्रुतिर्मायामात्रमीश्वरेच्छाधीनमिदं द्वैतम्:—

'विष्णोरिच्छावशत्वात्तु मायामात्रमितीर्यते'

इति स्मृतेः। "अद्वैतम्परमार्थतः" इति ल्यब्लोपे पञ्चमी। स्वतन्त्रमपेक्ष्य ब्रह्माद्वितीयमित्यर्थः। 'स्वतन्त्रं परमार्थाख्यं' इति स्मृतेरित्येवं व्याख्यातेति कथं शुक्तिरजतवज्जगतो मिथ्यात्वमिति वाच्यम्। उदाहृतानामघेयस्मृतिशकलद्वयस्य प्रदर्शितानन्यगतिकानेकोपबृंहकोपबृंहितमायामात्रमितिश्रुतिव्याख्यानानर्हत्वात्।

ततश्च प्रत्यस्तमिताशेषविशेषप्रत्यगभिन्नाद्वितीये चिदेकरसे ब्रह्मण्येवोदाहृत श्रुतितात्पर्यमिति सुधीभिर्विभावनीयम्। अन्यथा वाक्यस्य सम्भवत्तात्पर्यगोचरार्थं विहायासंभवच्छक्तिगोचरार्थप्रामाण्यनिर्बन्धे नित्यनिवृत्तगतयोऽपि सर्वतस्तिष्ठन्ति। कूलम्पिपतिषतीत्यादिवाक्यानामपि तादृशनिर्बन्धापत्तिः।

एतेन 'ब्रह्मैव सन् ब्रह्माप्येति', 'ब्रह्मविद् ब्रह्मैव भवति', 'ब्रह्मविदाप्नोति परम्' इत्यादिवाक्यजातमौपचारिकब्रह्मप्राप्तितात्पर्यमेवेत्यपि वेदितव्यम्।

यत्तावदुक्तं यथा मृत्पिण्डे विज्ञाते सर्वं मृन्मयं विज्ञातम्भवति एवं कस्मिन्विज्ञाते सर्वमिदं विज्ञातम्। जगदभिन्ननिमित्तोपादनकारणं वस्तु किमिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावदित्यानुश्रविकप्रश्नानुसारमादौ व्याख्याय, पश्चात्तद्विरुद्धं न ह्यभिन्नयोरेवोपादानोपादेयभावनियम इति विलिख्य दृष्टान्तितमृद्घटयोरिव ब्रह्मजगतोरनर्थान्तरत्वनियममुदधिं कपय इवोल्लङ्घ्य आम्नान्पृष्टः कोविदारानाचष्ट इतिवत्तेनाङ्गिरसेन शौनकम्प्रत्यपृष्टं कुण्डबदरयोरिव ब्रह्मजगतोराधाराधेयभावं स्पष्टीकर्तुमव्यवहिताद्व्यवहितस्याधारत्वं मुख्यं दृश्यते, यथास्तरणांशुकदर्भेभ्यः पर्यङ्कभूतलयोरेव पुरुषधारकत्वं, सामर्थ्यात्, आस्तरणांशुकदर्भाणां पुरुषव्यवधायकत्वमात्रमेव, न पुरुषधारकत्वं, सामर्थ्याभावात्। व्यवहिताद्व्यवहितस्याधारत्वं यथा कुम्भोदरसम्भृतमम्भः प्रति पुरुषस्याधारत्वमेवमव्यक्तव्यवहितप्रपञ्चम्प्रत्याधारत्वं ब्रह्मणः। न च पुरुषस्याम्भोधारककुम्भधारकत्वमेव, नाम्भोधारकत्वमिति आच्यम्। तथा सत्यम्भोधारणजनितश्रमः पुरुषस्य न स्यादिति प्रतिबन्ध्या ब्रह्मजगतोरानुश्रविकोपादानोपादेयभावं नाशयित्वान्ततो 'विघ्नेश्वरम्प्रकुर्वाणो रचयामास वानर' मितिवत्कुम्भव्यवहिताम्भोधारणजनितात्यन्तक्लेशः पुरुषशिरसीवाव्यक्तव्यवहित प्रपञ्चधारणजनितात्यन्तक्लेशोऽपि सत्यज्ञानानन्दस्वरूपे परमात्मन्यारोपितो यैस्तेऽश्वश्रमापनोदनाथ तद्भारं स्वशिरस्यारोप्य स्वयमश्वानारुरुहुरित्यलम्परकीयव्याख्यानगतदुरुद्धरविरोधप्रदर्शनेन।

यदुक्तं अपृथक्सिद्धयैक्यमवयवावयवि—जातिव्यक्ति—गुणगुणिस्थलेषु पृथक्स्थितिप्रतिपत्त्योरभावादवसीयते। एवं चिदचिद्ब्रह्मणां त्रयाणामप्यपृथक्सिद्धयैक्यमेव विशिष्टाद्वैतिनामस्माकमिष्टं; सिद्धिर्नाम स्थितिः प्रतिपत्तिश्चेति। तदप्यत्यन्तासम्भवदुक्तिकमेव। विकल्पासहत्वात्। किमुक्तत्रयस्य तदतिरिक्तैकैकापरकस्थितिवच्चिदचिद्ब्रह्मणान्त्रयाणान्तदतिरिक्ते कस्मिंश्चित्स्थितिः आहोस्विन्नीलगुणस्योत्पल इव चिदचितोर्ब्रह्मणि ?। नाद्यः। परमते चिदचिद्ब्रह्मव्यतिरिक्तस्य कस्यचिद्वस्तुनश्शशविषाणायमानत्वेन तत्र तत्स्थितेरपि तथात्वापत्तेः। न द्वितीयः। नीलगुणस्योत्पल इव चिदचितोर्ब्रह्मण्यपृथक्स्थितिपक्षाभ्युपगमस्य ब्रह्मण्युक्तजडत्वदुःखित्वादिदोषापादकत्वात्। अन्यथा यस्योत्पत्तिविनाशापचयसत्तादिकमाश्रयोत्पत्त्यादिनैव व्यवह्रियते तत्तदपृथक्सिद्धमिति स्वोक्तिव्याघातः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मात् श्रुतितात्पर्यनिर्णेत्रप्रयायिश्रीमच्छङ्करभगवद्भाष्यकाराभिमतब्रह्मविवर्तपक्षएव साक्षान्मोक्षैकहेतुः, न तत्परिणामपक्षः, न वा तदारम्भपक्ष इत्यक्षतम्। नह्यन्धसहस्रमपि चक्षुष्मत एकस्य रूपविषये प्रतिवादीभवितुमर्हतीति न्यायात्।

अपि च कूपखनने कृते भूतोत्पत्तिरितिवद्विशिष्टाद्वैतिनाम्मते विपुलशिलातले टङ्कविनिर्मितमण्डूकादिप्रतिमावज्जीवानाम्ब्रह्मण्यपृथक्त्वेन गतागतादिविभ्रमो विरुध्यते। अद्वैतिनाम्मते तु ब्रह्मणि जीवानामाविद्यकोपाधिभिर्घटैराकाशस्येव गतागतादिविभ्रमो न विरुद्ध्यत इत्ययमेको विशेषः।

तथा च श्रूयते - घटसंवृतमाकाशं नीयमाने घटे यथा।
घटो नीयेत नाकाशः, तद्वज्जीवो नभोपमः॥ इति।

पाञ्चरात्रागमिका अप्येवमेवाहुः :—

यथा घटस्थमाकाशं नीयमाने घटे तथा।
यातीव वस्तुतो नैव भेदोऽस्ति परजीवयोः॥ इति।

सू - अविभागेन दृष्टत्वात्। अन्यार्थश्च परामर्श इति सूत्रद्वयमुखेन तत्कर्ता-भगवान् बादरायणोऽपि तदेव व्यक्तीचकार। अपि च स्वप्रणीतविष्णुपुराणे श्रुतिविश्रुतयशोराशिना भगवता मुनिवरेण पराशरेणाप्येवमेवोक्तम्—

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञकः।
अभेदव्यापिनो वायोस्तथास्य परमात्मनः॥
एकस्वरूपभेदस्तु बाह्यकर्मवृतिप्रजः।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः॥ इति

सुखबोधायोदाहृतवैयासिकपाराशर्यसूत्रश्लोकार्थः संक्षेपेणात्र दर्श्यते। अविभागेन ब्रह्माभिन्नतया ज्ञानिनामवस्थानम्। न तत्सम्बन्धितया। दृष्टत्वात्। ब्रह्मविद् ब्रह्मैव भवतीत्यादिश्रुतेः परामर्शो जीवपरामर्शः अन्यार्थः ब्रह्माभेदेन प्रतिपादनार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभेदव्यापिनः अभेदस्य भेदरहितस्य व्यापिनो व्यापकस्य वायोः षड्जादि-संज्ञादिभेदः वेणुरन्ध्रविभेदेन कृतः । तथास्य परमात्मनोऽपि एकस्वरूपभेदः एकं यत्स्वरूपं तस्य भेदः, बाह्यकर्मवृतिप्रजः बाह्यं स्वरूपाद्बहिष्ठमविद्याकृतं यत्कर्म तदेव-वृतिः आवरणं तत्प्रकर्षेण जायत इति प्रजः । देवादिभेदे देवादिशरीराख्यो-पाधिभेदेऽपध्वस्ते विनष्टे आवरणो वृतिरहितो यो भेदः स नास्त्येव ।

अत्र भगवान्गीताचार्यः श्रीकृष्णोऽपि तथैवाह—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ इति ।

किमत्र बहुना ।

एको देवस्सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षस्सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥

इत्यादिश्रुतेः परजीवयोरौपाधिक एव भेदः न स्वाभाविक इत्युक्तम् । अनेनोदा-हृतैको देवस्सर्वभूतेषु गूढः, ईश्वरस्सर्वभूतानामिति श्रुतिस्मृत्योरसकृत्प्रयुक्तभूतशब्दाः विनाशिव्यक्तिगोचरा एव, न तदतिरिक्तात्मगोचरा इति वेदितव्यम् । इदमत्रा-वधेयम् । यथैक एवाकाशो घटमठाद्यनेकोपाधिष्वविशेषेणोपहितः तत्तदुपाधि-भेदेन घटाकाशो मठाकाशस्तदनुपहितो महाकाश इति च व्यपदिश्यते, एवमेक एवात्मा स्वाध्यस्तानाद्यविद्याप्रत्युपस्थापितदेवतिर्यङ्मनुष्यपशुपक्ष्याद्याकारानेकोपाधि-ष्वविशेषणोपहितस्तत्तदुपाधिभेदेन देवो मनुष्यः पशुः पक्षी, तदनुपहितः परमात्मेति च व्यपदिश्यत इति निस्तुलसमस्तनिगमान्तनिगूढाशय इति तत्त्वविद्रहस्यम् ।

न च (श्रु) द्वा सुपर्णा सयुजा सखायौ
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति ॥ इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्"

इति श्रुतिसूत्रद्वयं परजीवयोर्नियन्तृनियम्यभावेनैकशरीरवृत्तित्वमावेदयत्यतः कथं तयोरभेद इति वाच्यम्। उदाहृतश्रुतिसूत्रद्वयस्य पैङ्गिरहस्यब्राह्मणव्याख्यानुसारेण सत्त्वक्षेत्रज्ञपरतया व्याख्यातत्वात्। तथा च पैङ्गिरहस्यब्राह्मणं—

'तयोरन्यः पिप्पलं स्वाद्वत्ति सत्त्वमनश्नन्नन्यो अभिपश्यति ज्ञः'

इति। अन्यथा राजभृत्यावन्नम्भुञ्जाते इतिवत्परजीवयोरविशेषेण कर्मफलभोक्तृत्वमामनन्ती—

(श्रुः) ऋतम्पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्ध्ये।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः॥

इति श्रुतिर्निपीडयेत। एतेन (श्रु) "य आत्मनि तिष्ठन्नात्मानमन्तरो यमयती"-त्यन्तर्यामिब्राह्मणवाक्यगतात्मशब्दोऽपि सत्त्ववचन एवेति वेदितव्यम्।

न च प्राप्ताया अपि भुवो देशान्तरवैशिष्ट्येन गन्तव्यतेव प्राप्तस्यापि ब्रह्मणः केनचिद्वैशिष्ट्येन गन्तव्यतेति वाच्यम्। भुवो गन्तृभिन्नत्वाद्देशान्तरवैशिष्ट्येनास्तु नाम गन्तव्यता। ब्रह्मणो गन्त्रपृथक्त्वेन गन्तव्यताऽयोगात्। ततश्च विशिष्टाद्वैत्यभिमतो गन्तृगन्तव्यगमनसापेक्षो मोक्षः कथामात्रशेष इत्यलमति प्रपञ्चेन।

यदुक्तं ब्रह्मणोऽनन्तगरुडविष्वक्सेनादिनित्यविभूतिम्प्रत्युपादानत्वैकदेशभूतमपृथक्सिद्धयाश्रयत्वमेवोपादनत्वं तदेवात्मत्वञ्चेति, तत्कुक्कुट्याः पूर्वो भागः पच्यते अपरो भागः प्रसवाय कल्पित इतिवद्विरुद्धार्थाभिधायकम्। 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसमिति' सूत्रे अमूर्तयोर्वियद्वाय्वोरपि कार्यत्वेनानित्यत्वस्य सूत्रकारेण भगवता व्यासेनैव व्यक्तमुक्तत्वात्। अस्य सूत्रस्यायमर्थः—अपीतौ प्रलये केचिद्भावा विभागप्राप्ताः केचिन्नेति सांख्यप्रक्रियामनूद्य विभागप्राप्ता-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यदार्थान्प्रति प्रधानमुपादानन्न स्यात्, तद्वत्प्रसङ्गाद्ब्रह्मण्येकीभूतत्वात्सांख्यमतम-समञ्जसम् । तथा च श्रूयते 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति । अत एवात्र—

"आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामपेक्ष्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

इति श्रीमद्गीताचार्यवचनं लोकसामान्यस्यानित्यत्वेनानुपेयताम्प्रदर्शयत् शुक्तिरजतवदाज्ञानिकजगदधिष्ठानस्य ब्रह्मणो नित्यत्वेनोपेयताम्प्रदर्शयति । तथा चानन्तगरुडविष्वक्सेनादिनित्यविभूत्याश्रयस्य वैकुण्ठलोकस्य पराभिमतनित्यत्वं प्रच्छन्नवृक्षरक्षोन्यायमनुसरति । अन्यथा यत्कृतकन्तदनित्यमिति सामान्यव्याप्ति व्याघातः स्याद्दुरपह्नव इत्यलमतिविस्तरेण ।

न च वस्तुनस्सत्यत्वप्रयोजकमर्थक्रियाकारित्वमन्वयव्यतिरेकसिद्धम् । अतः कथमर्थक्रियाकारि जगच्छुक्तौ रजतवद्ब्रह्मण्यज्ञानाध्यस्तमिति वाच्यम् । असतामपि छायाप्रत्याह्वयाभासानाम्मरणादिरूपार्थक्रियाकारित्वस्य विश्वजनीनत्वात् । तदुक्तं विशिष्टाद्वैतिनामिष्टकोव्यनुप्रविष्टे श्रीभागवते-

च्छायाप्रत्याह्वयाभासाः प्रथन्तोऽप्यर्थकारिणः ।
एवं देवादयो भावा यच्छन्त्यामृत्युतो भयम् ॥
विशुद्धं ज्ञानमेवैकम्मायया भासते त्रिधा ।
शाब्दस्य हि ब्रह्मण एष पन्थाः यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्त्वत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥

इत्यादि । एतेनार्थक्रियाकारित्वन्न जगतस्सत्यत्वप्रयोजकमित्यन्यत्र विस्तरः ।

न च रज्जुज्ञानाव्यवहितोत्तरक्षण एव तत्रारोपितसर्पजन्यभयकम्पपलाय-नाद्यनेकानर्थनिवृत्तिवदज्ञानाध्यस्तजगदधिष्ठानब्रह्मज्ञानाव्यवहितोत्तरक्षणे ज्ञानेनाज्ञाने विनष्टेऽपि तत्कार्याध्यात्मिकाद्यनेकानर्थनिवृत्तेरदर्शनाद्विषमोऽयं दृष्टान्त इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाच्यम् । रज्जुज्ञानेनाज्ञाननिवृत्तिसमकाले तत्कार्यभयकम्पपलायनादिदुःख-निवृत्तावपि तदानीन्तनाधःपातजनितशिरोव्रणस्य मासेनोपशमदर्शनात्तन्न्याये-नादेहपातमाध्यात्मिकादिदुःखानुवृत्तेः श्रुत्यैवानुगृहीतत्वात् । तथा च श्रुतिः—तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये इति । अन्यथा (श्लो) 'उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते' इति नयो न केवलमेकएवेयादनयतां किन्त्वध्यात्मशास्त्रप्रणेतृलोकानुग्राहकव्यासादिमहानुभावाभावोऽपीत्याद्यापत्तयस्संख्या-तिगास्स्युरित्यलं शास्त्रविरुद्धप्रसङ्गेन ।

यदुक्तं ब्रह्मणश्चिदचिदात्मकजगदन्तर्यामित्वं तत्किम्ब्रह्मणश्चिदचिद्वि-शिष्टवेषेणोत शुद्धवेषेणेति । नाद्यः । चिदचितोस्तद्विशिष्टब्रह्मान्तर्यामिकत्वस्य स्वस्कन्धोपरि स्वोपवेशनवदश्रुतदृष्टपूर्वकत्वेनाविस्रम्भणीयत्वात् । न द्वितीयः । विशिष्टाद्वैतिभिर्ब्रह्मणश्चिदचिद्विशिष्टयातिरिक्तशुद्धस्वरूपस्यानभ्युगतत्वेन चिदचितो-स्तदन्तर्यामिकत्वानुपपत्तेः । अन्यथा ईदृशासम्भाव्यमानार्थकवाक्यकल्पनायां सर्वत्र सर्वेषां सर्वार्थसिद्धिप्रसङ्गो भवेन्मूर्धाभिषिक्त इत्यलमतिप्रपञ्चेन ।

न च सुखदुःखप्राप्तिपरिहारयोर्विधिनिषेधप्रवृत्तिनिवृत्तिसाध्यत्वात्कथं कर्मनिरपेक्षब्रह्मविद्यायाः प्रमातृत्वादिबन्धनिवृत्त्युपलक्षितचिन्मात्रावस्थानलक्षण-मुक्तिफलकत्वमिति वाच्यम् । लोके स्मरणमात्रेण विस्मृतसुवर्णलाभे सुखप्राप्तेः रज्जुतत्त्वविवेकमात्रेण तत्रारोपितसर्पजन्यभयकम्पादिदुःखनिवृत्तेश्च सर्वैरनुभूय-मानत्वात् ।

एतेन ज्ञानकर्मसमुच्चयवादोऽपि निराकृत इति वेदितव्यम् । अन्यथा बद्धमुक्तयोरविशेषप्रसङ्गः । अत एव "अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतो न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" इति श्रुतिः प्रियाप्रियशब्दवाच्य सुखदुःखप्राप्तिपरिहारयोः शरीरसम्बन्धतदभावाधीनतां दर्शयति । अतश्च सशीर-मुक्तौ विषसम्पृक्तामृतवदल्पदुःखसंवलितानल्पसुखसम्बन्धोऽस्ति । अशरीर-मुक्तौ तु तत्सम्बन्धगन्धोऽपि नास्ति । ततश्च ब्रह्म निर्विशेषमेवेति सिद्धम् । तथा च श्रूयतेः—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

" अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥ इति ।

इदमेवाह भगवान् श्रीकृष्णोऽपि—

" अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः " इति । भगवान् सूत्रकारो व्यासोऽपि तदेवाह—सू—" तदव्यक्तमाह हि । आह च तन्मात्रम् । अरूपवदेव हि तत्प्रधानत्वात् " इति । तदुक्तमभियुक्तैरपि—

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मत ॥ इति ।

अत्र तत्त्वमस्यादिवाक्येषु अखण्डैकरसवाक्यार्थो विदुषां मत इत्यनेन संसर्गविशिष्टवाक्यार्थावविद्वन्मतावेवेत्युक्तम् । तथा च श्रूयते—"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवत्येवम्मुनेर्विजानत अत्मा भवति गौतमे " त्यादि । एवमेवोक्तं श्रीभागवते—श्लोः—

" यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरं ।
हित्वार्चाम्भजते मौढ्याद्भस्मन्येव जुहोति सः । इति ।

श्रीमत्सर्वज्ञविद्यारण्यपूज्यचरणैरपि तदेवोक्तं—

" दृक्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ ।
दृक् ब्रह्म दृश्यम्मायेति सर्ववेदान्तनिश्चयः " ॥ इति ।

न च " दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतिर्ब्रह्मणो दृश्यत्वं ब्रवीतीति कथं तस्य सर्वेन्द्रियागोचरत्वमिति वाच्यम् । दृश्यत्वञ्चात्र धीविषयत्वम् । तच्च ब्रह्मणि नास्त्येव । ' यत्तदद्रेश्यमिति ' श्रुतेः । अथ वा चरमान्तःकरण-वृत्तिरूपजनिष्प्रकारकधीविषयत्वस्य ब्रह्मणि सत्त्वेऽपि पराभिमतसप्रकारकधीविषय-त्वस्य तत्रासत्त्वात् । अन्यथा ब्रह्मणस्सर्वेन्द्रियागोचरत्वं ब्रुवन्त्यः—' यन्मनसा न मनुते येनाहुर्मनो मतं, यद्वाचानभ्युदितं येन वागभ्युद्यते, यच्चक्षुषा न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्यति येन चक्षूंषि पश्यति, तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते' इत्यादिश्रुतयः पीडयेरन् ।

अत्रैवं स्थिते स्थूणारुन्धतीन्यायेन निर्गुणब्रह्मानुसन्धानासमर्थानां मन्दमतीनामनुजिघृक्षया ब्रह्मण्यारोपितगुणवाचकानां 'सत्यकामस्सत्यसङ्कल्पः, हिरण्यश्मश्रुर्हिरण्यकेशः, आप्रणखात्सर्व सुवर्णः' इत्यादिश्रुतिवाक्यानां हेयगुण-प्रत्यनीकानन्तकल्याणगुणपरत्वकल्पनम्, निर्गुणं ब्रह्म जिज्ञासमानानाममन्द-मतीनाम्ब्रह्मणस्तत्त्वनिर्दिधारयिषया तत्रारोपितगुणसामान्यनिषेधपराणां निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्यादिश्रुतिवाक्यानामनन्तकल्याणगुण-प्रत्यनीकहेयगुणमात्रनिषेधपरत्वकल्पनं च केवलश्रद्धामूलमेवेत्यपि सद्भिस्सन्तो ष्टव्यम् ॥

इति श्रीमच्छङ्करकिङ्करब्रह्मानन्दकर्मन्दिनरकण्ठीरवीयम् ।

। ओं तत्सत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ यतिसार्वभौमोपहारः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीरस्तु

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

॥ यतिसार्वभौमोपहारः ॥

(गुरुसार्वभौमोपहारः)

॥ सदाशिवप्रणतिः ॥

परस्मै गुरवे तस्मै प्रणतोऽस्मि चिदात्मने ।
यन्मौलावैन्दवी रेखा कैतकीयशिखायते ॥ १ ॥

॥ अथ विष्णोः ॥

नमः कमलनेत्राय कमलागृहमेधिने ।
प्रपेदेऽनन्यसुलभा प्रसत्तिर्येन शाङ्करी ॥ २ ॥

॥ ब्रह्मणः ॥

नित्यं नलिनजाताय नमोवाकं प्रकल्पये ।
यस्यास्यालिः सरस्वत्या नृत्यरङ्गस्थलायते ॥ ३ ॥

॥ वसिष्ठस्य ॥

पिता पितामहो यस्य जगन्माता पितामही ।
तस्मै चित्रचरित्राय वसिष्ठाय नमो नमः ॥ ४ ॥

१. कैतकदलं विना कुसुमान्तराणां भगवदर्पणं दृष्टम्, अतो भगवदनभिमतं कैतकदलं चन्द्रकलारूपेण भगवदुत्तमाङ्गं भूषयतीवेत्युत्प्रेक्षा । "कलावतः कला यस्य कपर्दे कैतकायते" इति महतामुक्तेः ॥

२. शाङ्करी; दक्षिणामूर्तिरूपशङ्करसम्बन्धिनी, प्रसत्तिः प्रसादः; प्रपेदे कर्मणि लिट्, प्रापीत्यर्थः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ शक्तेः ॥

शक्तयेऽस्तु नमस्तस्मै तपोमौक्तिकशुक्तये ।
विशिष्टतरवासिष्ठपुण्यपुञ्जविपक्तये ॥ ५ ॥

॥ पराशरस्य ॥

पराशरमुनिं वन्दे परतत्त्वार्थवेदिनम् ।
पर्याप्तो यत्र जागर्ति प्रसादः पारदैवतः ॥ ६ ॥

॥ व्यासस्य ॥

वन्दे सात्यवतेयं तं मन्देतरगुणोदधिम् ।
भवन्ति यस्य सूत्राणि चित्रं बन्धविमुक्तये ॥ ७ ॥

॥ शुकस्य ॥

स दीव्यतु शुकः कोऽपि मम मानसपञ्जरे ।
वेदशाखासु तत्त्वार्थानालपन् यः प्रमोदते ॥ ८ ॥

॥ गौडपादाचार्यस्य ॥

चरणं गौडपादस्य शरणं करवाण्यहम् ।
श्रुत्यन्तसारसर्वस्वनिष्यन्दा यस्य सूक्तयः ॥ ९ ॥

॥ गोविन्दभगवत्पादस्य ॥

वन्दे गोविन्दपादाब्जचिन्तासंतुष्टचेतसम् ।
गोविन्दभगवत्पूज्यपादमादीनवच्छिदम् ॥ १० ॥

॥ अथ शङ्करगुरोः ॥

श्रीमते शंकरार्याय धीमतेऽद्भुतशक्तये ।
नमोऽस्त्वद्वैतसिद्धान्तस्थापनोपात्तमूर्तये ॥ ११ ॥

१०. आदीनवच्छिदम् आदीनवमित्यस्य शोक-विघ्न-दुरदृष्टान्यर्थाः, तानि छिनत्तीति तम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रेयसे शंकराचार्यो भूयसे बोभवीतु नः ।
गुरुमान्येन गोविन्दः सोऽपि यस्य गुरूयते ॥ १२ ॥
शंकराचार्यवर्यो मे संनिधत्तां सदा हृदि ।
सौम्यं यस्य वपुः ख्यातं विजहद्विषमां दृशम् ॥ १३ ॥
प्रकामं शंकरार्यस्य प्रसादो मयि जायताम् ।
विशिष्टाद्वैतिदैतेयविशिष्टाहङ्कृतिच्छिदः ॥ १४ ॥
कस्मैचित्परहंसाय सन्मानसविहारिणे ।
नमः पापमृणालालीकबलीकृतिशालिने ॥ १५ ॥
आचान्तमोचारसमाधुरीकैराचार्यवाचां निचयैर्गभीरैः ।
नीचीकृता दुग्धपयोधिगर्भवीचीप्रचारा विकसद्विचारैः ॥ १६ ॥
इति शैवकौर्मवचनैः प्रमापितां परमात्मतां यतिपतेर्विभावयन् ।
मतिमान् क उज्झति तदादृतं मतं श्रयतेऽपि हेतरदनाप्तजल्पितम् ॥१७॥
तथ्यं तथ्यं पुनरपि तथ्यं श्रुतिगदितं यत्तत्किल पथ्यम् ।
कथयति सत्यं श्रुतिरद्वैतं गुरुवर्यैरपि तद्व्याख्यातम् ॥ १८ ॥
विमतनिरासविदग्धा श्रुतिमुखविविधप्रमाणशतसिद्धा ।
शुद्धा शंकरबद्धा जयति कृतिर्मुक्तिदानसंनद्धा ॥ १९ ॥
निर्जरपथनिर्झरिणीनिर्झरगतिजर्जरीकृतिप्रौढाः ।
दुर्जनगलगर्जनबहुतर्जनपरिवर्जना गुरोर्वाचः ॥ २० ॥
आवर्त्याष्टादशधा समाहितः सूतसंहितां महिताम् ।
हितकाम्ययाभिहितवान् भाष्यं शारीरकं गुरुर्जगताम् ॥ २१ ॥

१२. येन शिवरूपेण शङ्करेण गोविन्दः गुरुमान्-गुरुरस्यास्तीति गुरुमान् बभूव । सोऽपि गोविन्दः यस्य शङ्कराचार्यरूपिणः शिवस्य गुरूयते गुरुरिवाचरति । अत्र गोविन्दपदेन दक्षिणामूर्तेरवाप्तोपदेशः शिष्यभूतो विष्णुः तस्यैव शङ्कराचार्यरूपस्य गुरुरपि बभूवेति प्रतिपाद्यते । गोविन्दपदं श्लेषेणाभिहितम् ॥

१३. विषमं तृतीयं लोचनमुज्झित्वा अवतीर्णः समाक्षः, समदर्शीत्यर्थः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरुशंकरपदपङ्कजयुगकिङ्करतामतिर्यदाङ्कुरति ।
न विशङ्कटभवसङ्कटमधिरोहति हृदि पदं तदा प्रभृति ॥ २२ ॥
श्रुतिविहिते क्षतिरहिते महितेऽतिहिते च शङ्कराभिहिते ।
हृदि निहिते सपदि मते स्थितममृतेन ध्रुवं करगतेन ॥ २३ ॥
भूषणाय निगमान्तगवीनां भीषणाय कथकप्रकराणाम् ।
शङ्कराय भवसिन्धुनिमज्जत्किङ्करावनकृते प्रणतोऽस्मि ॥ २४ ॥
क्षपणककणभक्षपक्षकक्ष्या-
क्षपणचणानि सदुक्तिमौक्तिकानि ।
यतिपतिमुखशुक्तिजानि जाग्र-
त्यखिलसुदृग्जनकण्ठभूषणानि ॥
दर्पोपसर्पदविषह्यभवोग्रसर्प-
व्यालीढविश्वजनजीवनदानशौण्डम् ।
आस्वाद्य शङ्करवचोऽमृतमात्मनीनं
चेतो दधिस्यति मधुस्यति कस्य लोके ॥ २६ ॥
आर्हता गर्हितानर्हता गीर्हताः
सौगतास्ते गता भूगता वाग्यताः ।
पण्डिताः खण्डिताश्चण्डतामण्डिता
द्वैतिनोऽद्वैतविद्योतनेऽस्मद्यतौ ॥ २७ ॥
अनेकजनिसंपनीपतदघौघविध्वंसिनी
प्रपन्नजनतावनी प्रणिपनीपतत्पावनी ।
जगद्गुरुपदाब्जयोर्विरचिताद्य सौधाशनी
धुनीव नमसां मनो मम पुनातु पौनःपुनी ॥ २८ ॥

२७. गर्हितानर्हताः, आर्हताः, गीर्हताः आचार्यगीर्भिर्हताः इत्यर्थः ॥
२८. नमसां पौनःपुनी, पुनःपुनर्भाव इत्यर्थः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अकण्टकनिरोधनैरनुदयत्तमोबाधनै-
रसाध्वसनिबन्धनैः कृतपदात्मसंविद्धनैः ।
भवामयनिवर्तिनी भवुकजालनिर्वर्तिनी
जगज्जडिमकर्तनी जयति शांकरी वर्तनी ॥ २९ ॥
नमस्कर्मीकुर्मः कमपि गुरुमद्वैतरसिकं
कुदृष्टिव्रातान्धंकरणमदकूलङ्कषकथम् ।
सुधासिन्धूदञ्चद्बहुललहरीबद्धकलहै-
र्गिरां गुम्फैर्भान्तं निगमसुभगंभावुकपथैः ॥ ३० ॥
अखर्वाश्चार्वाका गलितगुरुगर्वा नतमुखाः
प्रचण्डाः पाषण्डाः श्लथपृथुवितण्डाः कृतमुखाः ।
अशक्ताः शाक्तेया द्रुतगतदुरुक्ताः सुविमुखाः
यतीन्द्रे निस्तन्द्रे श्रुतिशिखरचन्द्रे कृतरुषि ॥ ३१ ॥
अनल्पजल्पकल्पनाविदग्धबौद्धदुर्धरो-
र्वखण्डगर्वखण्डनप्रचण्डपाण्डितीभृतः ।
वितर्ककर्कशोत्पतत्कुतर्कवक्रवाक्क्रम-
च्छिदानिदानयुक्तयः स्फुरन्ति शंकरोक्तयः ॥ ३२ ॥
कथागलत्कथंकथास्तथागतास्तथागताः
यथायथं श्लथापथा मुधाप्रथाः कुतार्किकाः ।
जिनाम्बपाब्धिमज्जना निरस्य कण्ठगर्जना-
न्यभेदवादमेदुरोक्तिसादरे यतीश्वरे ॥ ३३ ॥
भट्टमतकुट्टिमविघट्टनपटिष्ठं
पक्षधरपक्षपरितक्षणशतारम् ।

२९. वर्तनी एकपदीत्यर्थः । कृतपदा लब्धा ॥
३१. कृतमुखाः वक्तुमारब्धवन्तः ; अखर्वाः उन्नताः, उद्धताः इत्यर्थः ॥
३३. कथायां वादे गलन्ती कथमिति कथा येषां ते । श्लथमपथं येषां ते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुर्ग्रहदुराग्रहगुरुग्रहनिरासं
शङ्करगुरुं कलिहरं कलय चेतः ॥ ३४ ॥
जीवपरभेदपरवादपरतन्त्रो-
द्वेलमदतालतरुजालकरवालाः ।
किङ्करहृदङ्कुरितपङ्कहरणा नि-
श्शङ्कमकलङ्कगुरुशङ्करसुचर्याः ॥ ३५ ॥
परश्शतश्रुतिस्मृतिप्रमाणसंमते मते
यतिक्षितीश्वरादृते परात्मभेदवर्जिते ।
सति त्रिलोकपूजिते सति क्षितौ स्वसाहसा-
दनाप्तजल्पितं मतं न कस्य हास्यहेतवे ॥ ३६ ॥
जैना विदुद्रुवुरमाना निलान्तमतिहीना विदूनहृदयाः
हीणा बभूवुरथ काणादकौशलधुरीणाः प्रमाणचतुराः ।
श्रद्धां जहुः सपदि बुद्धागमे सकलबौद्धाः स्वबुद्धिविकलाः
सिद्धान्तिते निगमसिद्धाद्वितीयमतशुद्धाशये गुरुवरैः ॥ ३७ ॥
शैवा दधुश्चरणसेवां क्षणादथ च काणादकल्पनकथा-
क्लिष्टाशया अहह भट्टानुगाः क्वचन नष्टा बभूवुरखिलाः ।
सौराः कथासमरशूरा अपि द्रुतमधीरा दिगन्तरगता
मोदादिह क्षणमभेदानुबन्धिमतवादागते गुरुवरे ॥ ३८ ॥
कल्पन्तां मदनल्पतापधुतये कल्पान्तकालोदित-
स्फूर्जद्भूर्जटिकण्ठकन्दरतटीनिर्जातगर्जानिभाः ।
वाग्गुम्भाः प्रतिवादिदम्भदलनासंरम्भसंजृम्भणा-
रम्भाः शंकरदेशिकस्य विमलाद्वैतप्रियंभावुकाः ॥ ३९ ॥

३४. भट्टमतमेव कुट्टिमः निबद्धा भूः तस्य विघट्टनेऽतिशयेन पटु । पक्षधरमिश्राः प्रसिद्धास्तान्त्रिकाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सन्तु श्रीगुरुशंकरार्यचरणाः संतुष्टये नः श्रित-
स्वान्तध्वान्तनितान्तकृन्तनकलानिस्तन्द्रचन्द्रातपाः ।
दृप्यद्दुर्मतवादिमस्तकतटीविन्यस्तवामाङ्घ्रयः
सद्यः संसृतिहारिहृद्यनिरवद्याद्वैतविद्याञ्चिताः ॥ ४० ॥

दम्भं स्तंभयते द्विषन्तपकथारम्भैः क्रुधाजृम्भितै-
र्गम्भीरैःपवनोदरंभरिगवीगुम्भप्रियंभावुकैः ।
उग्रंपश्यगिरां च शाब्दिकविदामभ्रंकषप्रामवैः
आढ्यंभावुकमेधसे नम इदं श्रीशंकरायार्पये ॥ ४१ ॥

आम्नायान्तवनान्तरेषु नितरां सञ्चारिणी शांकरी
गौः काचिज्जडदुर्लभामृतझरीसंदोहदोहीयसी ।
द्राघिष्ठां विविधाघतार्णपटलीं निर्मूलमुन्मूलये-
दज्ञानाम्बुकरम्बिते मनसि मे गाढं प्ररूढां चिरात् ॥ ४२ ॥

यत्पादाम्बुजचिन्तनं तनुमतां सन्तानशाखायते
भाष्यं यत्फणितं चिरन्तनगवीहैयङ्गवीनायते ।
यस्याज्ञाखिललोकमौलिवलभीमालासु मालायते
तस्मै शंकरदेशिकाय नमसां साहस्रमाशास्महे ॥ ४३ ॥

मृद्वीकान्तरनिस्सरन्मधुझरी मृद्वी कथं चेतसे
साध्वी कस्य विकस्वराम्बुजगलन्माध्वीककल्लोलिनी ।
दुग्धे किन्नु हृदि प्रमोदलहरीं दुग्धे स्फुरन्माधुरी-
स्फीते हन्त कथामृते यतिपतेः पीतेऽविगीते क्षणम् ॥ ४४ ॥

वैराग्यस्य निधिः श्रुतस्य वसतिर्वात्सल्यवारांनिधि
र्दाक्षिण्यस्य विहारभूर्घनतपस्सर्वस्वमञ्जूषिका ।
शान्तेः केलिगृहं प्रसूतिभवनं दान्तेः कृपायाः खनि-
र्भूयाच्छंकरदेशिकोऽखिलगुणग्रामाभिरामो मुदे ॥ ४५ ॥

४१. पवनोदरंभरिगवी-पातञ्जलमहाभाष्यं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गर्वग्रन्थिग्रथितहृदयद्वैतिदैतेयजात-
स्फीतस्फीतक्षुभितजगदाप्यायनासावताराः ।
आकल्पं मे निरवधि मुदे शंकरार्याः समन्ता-
दाकल्पन्तामकृतकगवीश्रान्तिविश्रान्तिशालाः ॥ ४६ ॥
तृष्णालीलाललाटंतपतपनविभाक्रूरसंसारधन्वा-
ध्वन्यध्वन्यात्युदन्याभरहरदमृतस्यन्दिवाहिन्यहीना ।
एनःकूलंकषोर्मिः कुवलयकुशलश्रेणिपाणिंधमी मां
वाणी गैर्वाणवेणी विमलयतुतरां शांकरी पङ्कलीनम् ॥ ४७ ॥
निर्मथ्याम्नायसिन्धुं निजमतिविभवेन्धानमन्थानशैले-
नोद्धृतं प्राक् प्रभूतं त्रिभुवनभयदं द्वैतहालाहलौघम् ।
निर्धूयाह्लाय दूरात्तदनुसमुदिताद्वैतपीयूषपूरं
योऽदान्मोदाद् बुधानां क्षपयतु यतिराट् सोऽयमादीनवं नः ॥ ४८ ॥
दुर्वाराखर्वदुर्वाद्यनवधिकरुथागर्वनिर्वापकोक्ति-
गाम्भीर्यौदार्यवैर्यः श्रितजनकरुणास्थैर्यमाधुर्यधुर्यः ।
साक्षान्मोक्षैकदीक्षः पदविनतिजुषां संततामाम्नायचिन्ता-
ध्वन्यध्वन्योऽस्ति धन्यो जगति यतिपतेः को वदान्यो वदान्यः ॥ ४९ ॥
विश्राम्यद्वीरवादा दधुरधिवदनं तान्त्रिकाः कार्ष्ण्यकाष्ठां
चित्ते धत्ते स्म तत्तादृशमतिविकलः साध्वसं माध्वसङ्घः ।
पाषण्डाः षण्डकल्पा जहुरतिमहतीं चण्डिमोद्दण्डलीलां
व्याख्यामाख्याति मुख्यामकृतकवचसां शङ्करार्ये सुचर्ये ॥ ५० ॥
व्याख्यां तत्त्वार्थमुख्यामकृतकवचसां शाङ्करीं शीलयित्वा ।

४९. अध्वन्यः—रान्थः। यतिपतेः, ल्यब्लोपे पञ्चमी, यतिपतिं वर्जयित्वा अन्यः वदान्यः कः, वद ॥

५०. आख्याति—प्रत्यन्तम्, आख्याति सतीत्यर्थः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दद्यादद्यानवद्यां रिपुदलननिराघाटघाटीक्रुधाटद्-
घोटीझाडित्यडम्भक्षपणनिपुणवाग्गुम्भसंरम्भलीलाम् ।
निश्शङ्कं शाङ्करं नश्चरणनलिनयोर्द्वन्द्वमद्वन्द्वविद्या-
पद्यासद्योगभाजां दरदलनविनिद्राणमुन्मुद्रभद्रम् ॥ ५१ ॥

अच्छेद्यानाद्यविद्याविषमविषझरीघोरसंसारपारा-
वारान्तर्दूरमज्जन्मनुजमुनिजनोत्तारदत्तावलम्बः ।
शश्वन्निश्श्रेयसश्रीदुरधिगममहासौधनिश्श्रेणिवेणुः
पाणिर्नाणीयसीं मे श्रियमिह जनयेच्छाङ्करः किङ्करस्य ॥ ५२ ॥

अव्यादव्याजभव्यार्पणचणचरणाम्भोरुहैकप्रणाम-
स्फूर्जद्दौर्जन्यगर्जन्निखिलखलखिलीकारचातुर्यधुर्यः ।
वेदान्तोदन्तचिन्तानवरतनिरतस्वान्ततन्तन्यमानो
हन्ताहन्तानिहन्ता यतिपतिरतुलां संपदं नः प्रतन्वन् ॥ ५३ ॥

सुदुर्लम्भं जम्भप्रमथनमुखानां मखभुजा-
मविद्यादोषघ्नं सुलभमखिलाद्वैतिविदुषाम् ।
धृतं गाहंगाहं श्रुतिशिखरसिन्धुं गुरुवरै-
र्मनः स्वादं स्वादं न विरमति भाष्यामृतमितः ॥ ५४ ॥

नीचा मोचारसश्रीर्दधि न च रुचये द्रप्समप्यस्तलिप्सं
हीनं हैयङ्गवीनं न हि मधु मधुरं शर्करा शर्करैव ।
सैषा गोस्तन्यगोस्तन्यमृतरसझरीमाधुरी मा धुरि स्यात्
साध्वी माध्वीकथा नो यतिपतिवचसां स्वादिमास्वादितश्चेत् ॥ ५५ ॥

५१. निराघाटा—निष्प्रतिबन्धा । घाटी—वेगः । घोटयः—अश्वाः । विनिद्राणं—विकसितम् ॥

५२. नाणीयसीम् अधिकाम् ॥

५३. हन्त, अहन्तानिहन्ता इति पदच्छेदः, हन्तेत्याश्चर्ये ॥

५५. मोचा—कदलीफलं । द्रप्सं—तक्रम् । हैयंगवीनं—नवनीतम् । शर्करा—सिकतारूपिण्येव । गोस्तनी—द्राक्षा । अगोस्तनी—अद्राक्षा । माध्वीकथा—नो साध्वी ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वस्तु स्वस्तिकृतेऽस्तु नस्तदमलं शस्तं समस्तैर्बुध-
रस्तोकं स्तवनीयमस्तकलुषं संसारनिस्तारणम् ।
ध्वस्तैनस्ततिनित्यगीस्ततमतिस्थैर्यैर्निरस्तद्वितं
निस्तन्द्राद्वयवादमेदुरकथाप्रस्तावनानिस्तुलम् ॥ ५६ ॥
संवर्तोद्वृत्तनृत्यत्प्रथमनटजटाजूटकोटीविटङ्क-
त्वङ्गद्गङ्गातरङ्गाविकलकलकलप्रक्रियान्यक्क्रियार्हा ।
निर्व्याजव्यासवाणीविवरणसरणीनैपुणी भाग्यभाजां
भूयस्यै भूतये नः परमगुरुगिरां प्राभवी वोभवीतु ॥ ५७ ॥
शंभुः किं स वृषोत्सुकोऽपि विषमं धत्ते स्वयं दर्शनं
विष्णुः किं पुरुषोत्तमोऽपि वहते नित्यं स दोषा दरम् ।
वेधाः किं मुखभङ्गभाक् स चतुरास्योऽपि स्वयं केनचित्
शङ्का शंकरदेशिके न निगलत्यङ्कूरिता नो हृदि ॥ ५८ ॥
हरिहरिदन्तदन्तिवरदन्तुरदन्तशिखा-
निबिडमरीचिवीचिनिचयप्रतिमल्लरुचा ।
विततवितण्डदुर्मतवितानविभेदभुवा
जयति यतीशिता श्रितकृपावसतिर्यशसा ॥ ५९ ॥
सांख्या गता ह्यियमसंख्याश्चिरं कलितसंख्याः समुज्झितमदाः
शक्ताः कथाकलहशक्ता अपि क्षणविमुक्ताभिमानकलनाः ।
प्राभाकरा अथ च वैभाषिका वदनशोभां जहुर्बहुभया
दिव्यां विवृण्वति गुरौ व्याससूत्रततिमव्याजभव्यवचनैः ॥

५६. नित्यगीस्ततं—वेदवाग्विस्तृतम् ॥

५८. वृषोत्सुकोऽपि धर्मोत्सुकोऽपि विषमदर्शनं धत्ते । वृषभवाहनः विषमाक्षः निटिललोचन इति भावः । पुरुषेषु उत्तमोऽपि सः दोषादरं धत्ते—दोषा भुजेन दूरं शङ्कां धत्ते इत्यर्थः । चतुरास्योऽपि मुखभङ्गभाक् परमशिवेन कृत्तपञ्चममुख इत्यर्थः । नः हृदि अङ्कुरिता शङ्का शंकरदेशिके न निगलतीत्यन्वयः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रक्षीणा लक्ष्मणोक्तिप्रततिरतितरां मध्वसिद्धान्तसिद्ध-
व्यन्वः प्रध्वस्त आसीदनुदितपुनरुन्मेषवार्तानुवृत्तिः ।
शुण्ठश्रीकण्ठकण्ठोद्गतवचनझरी लुण्ठिता कुण्ठितासीत्
व्यासश्रीसूत्रभाष्यं कृतवति महितं शंकराचार्यवर्ये ॥ ६१ ॥
शैवे कौर्मे पुराणे विशदमभिहितो यस्य लीलावतारः
श्रौतस्मार्तप्रतिष्ठाप्रणयनविमलज्ञानदानादिहेतोः ।
तिष्ये शिष्यैश्चतुर्भिः सह महितगुणैः पद्मपादप्रधानैः
सोऽयं श्रीशंकरार्यो जगदवनकृते प्रादुरासीन्महेशः ॥ ६२ ॥
ध्वन्यध्वन्यध्वन्यं धन्य नान्यं मान्यं मन्ये यतिमूर्धन्यात् ।
काव्यं श्रव्यं सहृदयभाव्यं दीव्यद्रसमतनोद्यन्नव्यम् ॥ ६३ ॥
भवतापहारि भवतादधिकं मम तादृशोग्रममतावसतेः ।
यतिराट्पदं नियतिराशिवशं तनुतामभद्रतनुतां च चिरम् ॥
शिवताति मेऽस्तु शिवतातिशयस्फुरितानुभावचरितानुगतम् ।
रुचिरोक्तिभागुरुचिरोक्तिरतं गुरुरत्नमाशु गुरुनूत्नगुणम् ॥ ६५ ॥
महिमाननीयचरितं दधतं महिमानमीड्यमहिमाल्यभृतः ।
अवतारभूतमवतान्नुवतां भवतारणं किमपि वस्तु मुहुः ॥ ६६ ॥
कलयामि शम्भुकलया परिष्कृतं तुलया विहीनमलयोक्तिसादरम् ।
बुधमण्डनाल्यमदखण्डनोद्यतं गुरुशंकरं तमुरुशंकरं सताम् ॥ ६७ ॥
चरणं शरणं करवाणि तमोहरणं तरणं विपदम्बुनिधेः ।
तरुणारुणतामरसप्रतिमं करुणावरुणायतनस्य गुरोः ॥ ६८ ॥
कर्मब्रह्मोक्तिनिष्ठापरिकलितबुधप्रेष्ठगोष्ठीगरिष्ठ-
स्तर्कातर्किप्रचण्डः फणिपतिफणितिप्रौढवादप्रगल्भः ।

६५. शिवताति शिवङ्करम् । उरुचिरोक्तिरतं अधिकवेदवाक्यरतम् । गुरवः गम्भीराः नूत्नाः नवनवाः गुणाः यस्य तत् गुरुनूत्नगुणम् ॥

६६. ईड्यम्, अहिमाल्यभृत इति पदच्छेदः ॥

६७. अलयोक्तिः वेदवचनम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदान्तेष्वद्वितीयः किमिह बहुगिरा सर्वतन्त्रस्वतन्त्रः
प्रायः पायादपायात्प्रबलकलिहरः षण्मतस्थापनार्यः ॥ ६९ ॥
सर्वज्ञाभरणं भवन्नपि शशी दोषाहितोन्मेषभूः
सद्वृत्तं बत धारयन्नपि गतो वक्रप्रभां भूयसा ।
यातोऽपि द्विजराजतां वितनुते यो विप्रयोगिव्यथां
तेनासौ जडमूर्तिना यतिपतिर्हन्तोपमीयेत कैः ॥ ७० ॥
घनघनसारसारसुरसिन्धुसुधालहरी-
दलदरविन्दचन्द्रबुधसिन्धुरबन्धुरुचि ।
यतिनृपतेर्यशो भृशमशेषदिशासुदृशां
कचकुचमण्डले विकचकुन्दति चन्दनति ॥ ७१ ॥
वसन्त इव सन्ततं सुमनसां नवामोदकृ-
न्नितान्तमधुरैः सदाशुकविवाङ्मयैरञ्चितः ।
सदागतिसुखैकभूरनुगतो रसज्ञालिभि-
र्व्यधत्त विविधागमव्रजविकासमस्मद्गुरुः ॥ ७२ ॥
दुग्धोदगर्भविहरल्लहरीसकाशैः
सान्द्रैर्यशोभिरमितैश्धनप्रधानैः ।
आशान्तपूरणकलाचतुरो यतीन्दु-
र्दूरं धुनोतु मम मोहमहान्धकारम् ॥ ७३ ॥

७०. दोषाहितोन्मेषभूः—रात्र्युत्पन्नविकासस्थानमिति परिहारः। सद्वृत्तं-सतां साधूनां नक्षत्राणां वृत्तं शीलं, वर्तुलं च। द्विजराजतां—ब्राह्मणराजतां नक्षत्रेशताम्। विप्रयोगिव्यथां—विप्राश्च ते योगिनश्च तेषां व्यथाम्। विरहिव्यथामित्यर्थः॥

७१. कचमण्डले विकचकुन्द इवाचरति कुचमण्डले चन्दनवदाचरति॥

७२. सुमनसां पुष्पाणां मनस्विनाम्, आशुकविवाङ्मयैः वसन्तपक्षे शुक विवाङ्मयैः शुकानां वीनां पक्षिणां च वाङ्मयैः, रसज्ञालिभिः "रसो वै सः" इति श्रुत्या रसः ब्रह्म तज्ज्ञा एवालयः तैः रसः मधु च, विविधागमव्रजः बहुविधानामागमनां समूह इत्यर्थः। वसन्तपक्षे अगमव्रजः वृक्षजातमित्यर्थः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमस्त्रिजगतीतमस्ततिमुषे समस्तगुरवे निरस्तकुदृशे
मदोन्मदवदावदोदितभिदाविदारणविधानिदानवचसे ।
धिनोति विनतान् धुनोत्यविनतांस्तनोति भजतां मनोऽतिविमलं
गुरुर्घनकृपागुरुः श्रितसुवस्तरुर्मम महत्तरोऽस्तु स मुदे ॥ ७४ ॥
चरीकरीति निर्वृतिं निरीतिरीतिमव्ययां
जरीहरीति चान्तरानरीन् गरीयसो भृशम् ।
दरीधरीति माधुरीं बरीभरीति चातुरीं
सरीसरीति सा झरी गुरोर्गिरश्चिरन्तनी ॥ ७५ ॥
श्रीसत्यादरशाली वृषक्षमाभृद्विहारपरिकलितः ।
हर इव नैव विषादी हरिरिव न जनार्दनो यतीशानः ॥ ७६ ॥
श्रीमत्काश्यपगोत्रमण्डनमणेः श्रीवट्टपल्ल्यन्वये
जातः साम्बशिवाभिधाद् बुधमणेः साहित्यचूडामणेः ।
तर्कालङ्कृतिकाव्यकेलिरसिकोऽकार्षीन्नृकण्ठीरवो
बाल्ये वीररसानुरूपरचनां श्रीशङ्करार्यस्तुतिम् ॥ ७७ ॥
कार्वेटीनगरीपुरन्दरवरश्रीब्रह्मभूमीभुजो
राज्यश्रीलतिकामुपघ्न इव यः पुष्यत्यमात्याग्रणीः ।
तस्य श्रीयुतगुण्डुवंशशशिनः श्रीमद्गुरुस्वामिन-
श्चेतस्तोषकृते कृता कृतिरियं श्रीशंकरार्यस्तुतिः ॥ ७८ ॥
सहृदयहृदयङ्गमा हि भङ्गी भवति गिरां नितरां रसानुकूला ।
तदिह न परुषापि दूषणीया मम रचना रसपोषणैकताना ॥
सकलसचेतश्चेतश्चमत्कृतिं या चरीकरीति गिरा ।
रचना सैव च रचना भवति तदन्या कवेः श्रमैकफला ॥

७६. सत्यादरशाली हरपक्षे सत्यां दाक्षायण्याम् । हरिपक्षे सत्यायां सत्यभामायाम् आचार्यपक्षे सत्ये ब्रह्मणि । वृषक्षमाभृद्विहारवृषभे कैलासे, वृषाचले वेति हरपक्षे। वेङ्कटाचल इति हरिपक्षे। जनानर्दयतीति जनार्दनः। यतीशानस्तु जनानामानन्दसंदायकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतिसार्वभौमपदयोरुपहारोऽयं समर्पितो भक्त्या ।
नरकण्ठीरवनाम्ना विद्वत्तोषाय विबुधेन ॥ ८१ ॥
गुरुरवनरकण्ठीरवरवभृतकण्ठोऽभयङ्गतो भवति ।
श्रुतिमात्रास्तध्वान्तान्तजवर्गकुदृष्टिदुष्टमातङ्गः ॥ ८२ ॥

इति नरकण्ठीरवशास्त्रिविरचितः
यतिसार्वभौमोपहारः समाप्तः

—:—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्

द्वैतिनोऽतथ्यदर्शिनः । विष्णुपुराणम् ।

(अंश - १. अध्याय - १२. श्लोक. ३१)

परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ।

न योगवान् न युक्तोऽभून्नैव पार्थिव योक्ष्यते ॥

(अं - २. अध्या - १४. श्लो. ३०)

माया तवेयमज्ञातपरमार्थातिमोहिनी ।

अनात्मन्यात्मविज्ञानं यया मूढो निरुध्यते ॥

अस्वे स्वमिति भावोऽत्र यत् पुंसामुपजायते ।

संसारमातुर्मायायास्तवैतन्नाथ चेष्टितम् ।

(अं ५ - अध्याय - ३० श्लो १४ - १५)

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

(अं ६. अध्याय - ५. श्लो. ९६)

एतत्तु यत् संव्यवहारभूतम् ।

(अं - २. अध्याय - १२. श्लो. ४५)

सितनीलादिभेदेन यथैकं दृश्यते नभः ।

भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥

अं. २. अध्याय १६. श्लो. २२)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोऽहं स च त्वं स च सर्वमेतत्

आत्मस्वरूपं त्यज भेदमोहम् । (अं २. अध्या १६ श्लो. २३)

तव मायैव सर्वात्मन्नियं देवादिकल्पना ।

(हस्तिगिरिमाहात्म्यम् अध्या ७ श्लो ४१)

तव लीलैव सकलं जगत् स्थावरजङ्गमम् ।

नामरूपविकल्पाभ्यां न चास्ति परमार्थतः ॥ (अध्या ७. श्लो. ५१)

———

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सामविधानब्राह्मणोक्तं

रात्रिसूक्तम्

अथ यः कामयेत पुनर्न प्रत्याजायेयमिति ॥ रात्रिं प्रपद्ये पुनर्भूः मयोभूः कन्यां शिखण्डिनीं पाशहस्तां युवतीं कुमारिणीमादित्यश्चक्षुषे वातः प्राणाय सोमो गन्धाय आपः स्नेहाय मनोऽनुज्ञाय पृथिव्यै शरीरमिति ॥

सा हैनमुवाच अस्मिन् संवत्सरे मरिष्यसि अस्मिन्नयनेऽस्मिन्नृतावस्मिन् मासेऽस्मिन्नर्धमासेऽस्मिन् द्वादशरात्रेऽस्मिन् षड्रात्रेऽस्मिंस्त्रिरात्रेऽस्मिन् द्विरात्रेऽस्मिन्नहन्यस्यां रात्र्यामस्यां वेलायामस्मिन् मुहूर्ते मरिष्यस्येहि स्वर्गं लोकं देवलोकं वा ब्रह्मलोकं वा क्षत्रलोक वा विरोचमानस्तिष्ठन् विरोचमानामेहि योनिं प्रविशेति ॥

नाहं योनिं प्रवेक्ष्यामि भूतोत्तमाया ब्रह्मणो दुहितुः संरागवस्त्राया जायते म्रियते संधीयते चेति ॥ यत एको योनिं प्रविष्टः जायते जातः सन् संम्रियते प्राणैः वियुज्यते मृतः संधीयते देहान्तरेण संबध्यते अत इति ॥

रात्रिस्तु मा पुनातु रात्रिः स्वमेतत् पुष्पान्तं यत् पुराणमाकाशं तत्र मे थानं कुरु (कुर्वन्) अपुनर्भवाय अपुनर्जन्मने एतावदेव रात्रौ रात्रेर्व्रतं रात्रेर्व्रतं चेति ॥

इति सामविधानब्राह्मणे रात्रिसूक्ते अपुनर्भवायाम्बिकाया उपास्यत्वं शासितम् ।

सामवेदीयतलवकारशाखीयकेनोपनिषदि—

"स तस्मिन्नेवाकाशे स्त्रियमाजगाम, बहुशोभमानामुमां हैमवतीं....सा ब्रह्मेति होवाच" इति सर्वज्ञेन ईश्वरेण सहसिद्धा ..... ब्रह्मविद्या-स्वरूपिणी इति प्रकाशितम् ।

अकार - उकार - मकारा ओमिति शिवः, उकारमकाराकारात्मिका उमा तच्छक्तिः ब्रह्मविद्या । विष्णुपुराणे—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"स्थानैरनेकैः पृथिवीमशेषां मण्डयिष्यसि ।
त्वं भूतिः सन्नतिः क्षान्तिः कान्तिर्द्यौः पृथिवी धृतिः ॥"
"लज्जा पुष्टिरुषा या च काचिदन्या त्वमेव सा ।
ये त्वामार्येति दुर्गेति वेदगर्भाम्बिकेति च"
इत्यादिश्लोकैरम्बिकायाः सार्वात्म्यं वेदगर्भत्वं च निरूपितम् ॥

रामायणे स्कन्दोपासकस्य स्कन्दसालोक्यसिद्धिरुक्ता ॥

ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः, (विष्णुपुराणे १-२१-५८)

माण्डूक्योपनिषदि विश्वतैजसप्राज्ञा इति व्यष्टौ, विराड्हिरण्यगर्भेश्वरा इति समष्ट्याम् "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" । इति तुरीयम् ॥

"ब्रह्मशक्तिः" (ईश्वरशक्तिः वासुदेवः)

गीतासु "ब्रह्मणो हि प्रतिष्ठाहं" मिति श्लोके भगवत्पादाः "यया च ईश्वरशक्त्या भक्तानुग्रहप्रयोजनाय ब्रह्म प्रतिष्ठते सा शक्तिः ब्रह्मैवाहं शक्ति-शक्तिमतोरनन्यत्वात्" इति भाष्ये ।

जगत्स्रष्टृशक्तिः ब्रह्मरूपेण, निर्वाहशक्तिः विष्णुरूपेण उत्तमलोक-दानपर्यन्ता, लयशक्तिः शिवरूपेण जीवन्मुक्तिरूपात्यन्तिकलयात्मकमोक्षार्थज्ञान-प्रदानपर्यन्ता ॥ आत्यन्तिकविमुक्तिर्या लयो ब्रह्मणि शाश्वते । विष्णु. ६. ८. ११

विष्णोः—नाविष्णुः पृथिवीपतिरिति प्रपञ्चपालकक्षत्रभावः ।

शिवस्य ज्ञानविरागब्राह्मणभावश्च सामवेदब्राह्मणे "... विरूपाक्षोऽसि ... त्वं देवेषु ब्राह्मणोऽसि, अहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावति ... ब्रह्मणः पुत्राय नमः इति घुष्यते । ब्रह्मणो भ्रूमध्यात् वरणा नासी वाराणसीसन्धिस्थानात् आविर्भूतः यः "शम्भुः आकाशमध्ये" यस्मात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते" सः स्तम्भादिव नृसिंहः, स शम्भुः "ब्रह्मललाटात् त्र्यक्षः शूलपाणिः अजायत"

विश्वाधिको रुद्रो महर्षिः इति च श्रुतिः ।

द्विसहस्रवत्सरेभ्यः प्राचीनेषु देशभाषाकाव्येष्वपि शिवः "पार्पान्, अन्दणन्, वेदियन्" इति ब्राह्मणपर्यायपदैः पदे पदे बोध्यते ।

धर्मप्रमाणविचारनिर्णयप्रामाणिकः महाकविः **कालिदासः, कुमारिलभट्टैः, कवितार्किकसिंहवेङ्कटनाथैश्च** स्वग्रन्थयोः सोदाहरणमुद्घोषितः कुमारसंभवकाव्ये "**एकैव मूर्तिर्बिभिदे त्रिधा सा**".... इत्याह ॥

द्रविडकाव्येषु कार्तिकेयस्यापि मुदल्व इति संबोधनं दृश्यते । अतिप्राचीन-विष्णुभक्तः पोय्कैआल्वारारव्यः मूर्तित्रयमपि मुदल्वर्=कारणवस्तु इति गायति ॥ मुदल्लट्टे उलगु इति च प्रसिद्धः प्रचीनः द्रविडकविः ।

"मुदल्ल" शब्दस्य प्राचीनद्रविडग्रन्थेषु जगदुपादानकारणवस्त्वात्मकभगवत्परतया प्रयोगो दृश्यते ॥

பொன் திகழும் மேனிபுரிசடையம் புண்ணியனும்
நின்றுலகம் தாய நெடுமாலும் – என்றும்
இருவரங்கத்தால் திரிவரேனும் ஒருவன்
ஒருவர் அங்கத்து என்றும் உளன்.

(பொய்கை ஆழ்வார்)

"அரியலால் தேவியில்லை ஐயன் ஐயாறனார்க்கே"

(வாகீசப் பெருமான் அப்பர்)

"மாதாய மாதவனை" (திருமழிசை ஆழ்வார்)

தாழ்சடையும் நீள் முடியும் ஒள் மழுவும் சக்கரமும் சூழரவும்
பொன்னணும் தோன்றுமால் ..... இரண்டுருவமொன்று
யிசைந்து (பேயாழ்வார்)

பிணங்கலிடுகாடதனுள் நடமாடும் பிஞ்ஞகனோடு
இணங்கு திருச்சக்கரத்து எம்மானார்க்கு இடம்

(திருமங்கையாழ்வார்)

பிறைதாங்குசடையானை வலத்தே வைத்து, பிரமனை உந்தியிலே தோற்றுவித்து (திருமங்கை ஆழ்வார்)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अद्वैतम् ॥

मायाशब्दार्थः—अविद्या—मोहतमः—मोहान्धतमसम् ।

विष्णुमायामहाऽऽवर्तमोहान्धतमसावृताः । (विष्णु ५-३०-१७)

तच्छ्रूयतामविद्यायाः स्वरूपं कुलनन्दन ।

अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः ॥ (६-७-११)

पञ्चभूतात्मके देहे देही मोहतमोवृतः । (६-७-१२)

तद्भावभावमापन्नः ततोऽसौ परमात्मना ।

भवत्यभेदी, भेदश्च तस्याज्ञानकृतो भवेत् ॥ (६-५-९५)

तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः । (विष्णुसहस्रनाम-)

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

(वि. पु. अं. ६. अध्या. ५. श्लो. १५)

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।

भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।

विनश्यत्स्वविनश्यन्तम्, ”

इति गीताश्लोकद्वये विद्यमानभूतशब्देन अन्तःकरणान्तः कार्यकरणसंघातः विवक्षणीयः । तत्र प्रतिफलन् एकः अभिन्नः परमात्मैव, “ भिद्यते जलचन्द्रवत् ” इति श्रुत्यनुसारेण प्रतिशरीरम् भिन्न इव प्रतीयमानः जीव इति व्यपदिश्यते । भेदवादे तु, विनश्यत्सु इति पदम्, विभक्तमिव च स्थितमित्यत्र इवकारश्च न घटेते, यतः तेषाम्, न ईश्वरः न वा जीवः विभक्त इव तिष्ठति, नापि विनाशी जीवः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवमेकमिंद-विद्धि-न-भेदि-सकलं-जगत् ।

वासुदेवाभिधेयस्य-स्वरूपं-परमार्थतः ॥ (विष्णु. पु. २-१५-३५)

वासुदेवस्सर्वम्—(गीता) **इदं सर्वं यदयमात्मा** (श्रुतिः)

प्रह्लादानुभवः—ब्रह्मसंज्ञोऽहमेवाग्रे तथान्ते च परः पुमान् । (१-१९-८६ अर्ध.)

एवं संचिन्तयन्विष्णुमभेदेनात्मनो द्विज ॥

(विष्णु. पु. १-२०-१ अर्ध.)

पारमार्थिकदशा-एकाखण्डब्रह्मानुभवः । **व्यावहारिकदशा**-जीवब्रह्म-प्रपञ्चभेदानुभवः ।

एकं सदैकम् परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ।

सद्भाव एवं भवतो मयोक्तः ज्ञानं यथा सत्यम् , असत्यमन्यत् ॥

असत्यस्य व्यावहारिकमात्रत्वम्—

एतत्तु यत् **संव्यवहारभूतं** तत्रापि चोक्तं भुवनाश्रितन्ते ॥

(२-१२-४४-४५)

पारमार्थिकभिन्नः व्यावहारिकः अभ्युपगम्यवादः यथा प्रह्लादवचनम्

कृत्वाऽभ्युपगमं तत्र संक्षेपः श्रूयतां मम ।

विस्तारस्सर्वभूतस्य विष्णोः सर्वमिदं जगत् ॥ (१-१७-८३)

"सत्यश्चानृतश्च सत्यमभवत्" पारमार्थिकव्यावहारिकसत्ते । **"सत्यस्य सत्यम्" "तेषामेष सत्यम्"** इत्यादिश्रुतिभिः, पारमार्थिक-व्यावहारिकप्रातिभासिकसत्ताश्च प्रतिपाद्यन्ते ।

मोक्षः ब्रह्मणि शाश्वते लयः

सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः ।

नैमित्तिकः प्राकृतिकः तथैवात्यन्तिको लयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्यन्तिकस्तु मोक्षाख्यः प्राकृतो द्विपरार्धकः ॥ (६-३-१)

आत्यन्तिकविमुक्तिर्या लयो ब्रह्मणि शाश्वते । (६-८-१)

विश्वमायानिवृत्तिः

"न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः"

इति गीतापद्यभाष्ये त्रिष्वपि कालेषु नित्यः आत्मस्वरूपेण इति भाष्यस्थः आत्मशब्दः एक-अभिन्नात्मपरः इतीममर्थमयं विष्णुपुराणश्लोकः द्रढयति, "सोऽहं स च त्वं स च सर्वमेतत् आत्मस्वरूपं त्यज भेदमोहम्" (२-१६-२३) इति ॥

ब्रह्मसूत्राणि

"**शब्दादेव प्रमितः**" अस्य सूत्रस्य विषयवाक्यम् "**अङ्गुष्ठमात्रः** पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥ इति । अत्र भगवत्पादभाष्ये "अङ्गुष्ठप्रमाणत्वेन प्रमितः ब्रह्म । ईशानशब्दादेव । अभिधान-श्रुतेरेव" इत्यर्थः निरूपितः । अत्र सूत्रे ईशानशब्दस्य यो रूढयर्थः स एव गृह्यते । अथातो ब्रह्मजिज्ञासेति प्रकृतं ब्रह्मैव अत्राप्यनुवर्तते । एतेन शारीरक-मीमांसायां सर्वेष्वप्यधिकरणेषु ईशानशब्दरूढयर्थः परमेश्वर एव विशेष्यतया विवक्षित इति गम्यते । तस्य शम्भोः उपमानत्वेन, "यथा सालिग्रामे हरिः, यथा सालिग्रामे विष्णुः" इत्यादिवाक्यैः विष्णुः उपस्थाप्यते । सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । यद्यपि सिद्धान्ते हरिहरयोर्भेदो नास्ति तथापि जगद्व्यापारानुकूलगुणोपाधिप्रयुक्तं हरेः उपमानत्वेनोपादानम् ।

पाञ्चरात्राधिकरणे नारायणस्य अभिगमनेज्यास्वाध्यायादिकं भगवत्पादै-रभ्युपगतमेव । जीवोत्पत्तिवेदविगानादिकं परं नाभ्युपगतम् ।

पाशुपताधिकरणे पशुपतेः ईश्वरस्य निमित्तकारणत्वमात्रत्वम् "इह प्रतिषिध्यते" इत्युक्तम् अभिन्ननिमित्तोपादानकारणत्वनिरूपणाय ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तनुपरोधादि त्यधिकरणे जगदभिन्ननिमित्तोपादानं यद् ब्रह्म तदेव ब्रह्म पाशुपताधिकरणे तान्त्रिकाभिमतनिमित्तकारणत्वमात्रप्रतिषे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घेन अभिन्ननिमित्तोपादानं सूत्रकारेण निरूप्यते। नो चेत् व्याहृताभिहारः सूत्रकार इत्यापद्येत इति घुष्यते भाष्ये। अनेनापि अभिन्ननिमित्तोपादानं कारणं पशुपतिरीश्वरः इति सूत्रभाष्यकृदाशयः प्रकाश्यते। पशुपतिरीश्वर जगदभिन्ननिमित्तोपादानमित्ययमर्थः प्रमिताधिकरणसिद्धान्तितमर्थं द्रढयति।

नारायणाभिन्नोमापतिः परमेश्वरः सर्वान् सर्वदा सर्वथा रक्षतु।

—०—

மஹாப்ரதோஷ ஸமயத்தில் ஸ்ரீ ருத்ரஜபம் செய்து
இந்த நான்குச்லோகங்களையும் சொல்லி ஸ்ரீ பரமேச்வரனை
நமஸ்கரிக்கலாம்.

विश्वं विष्णू रुद्र विश्वाधिकोऽसि
यज्ञो विष्णुस्त्वं तु राजाध्वराणाम्।
श्रीशस्वर्णाद्री आत्महस्ताग्रसंस्थौ
श्रीकण्ठोऽव्याद् देवताब्राह्मणोऽस्मान्॥
हालाहलं हर नियम्य परानियाम्यं
सर्वान् सुरान् सपदि यः स्वनतानरक्षत्।
दक्षानशिक्षत पुनर्युधि दक्षयज्ञे
स त्वं प्रभुः पशुपतिः प्रभुलक्षणोऽव्याः॥
गङ्गा धृता न भवता शिव पावनीति
नास्वादितो मधुर इत्यपि कालकूटः।
संरक्षणाय जगतां करुणातिरेकात्
कर्मद्वयं कलितमेतदनन्यसाध्यम्॥
गङ्गा धृता त्वयेशान गङ्गादर्पोऽपि नाशितः।
भगीरथानुग्रहार्थं लोकासम्भेदहेतवे॥

॥ शुभमस्तु ॥

———

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२१
महावीर

Ramani Brothers, 15, C. P. Ramaswamy Iyer Street,
Madras-600018.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri